Text Book for

# Intermediate

Second Year

Second Language: Part II

# SANSKRIT

## सुरभाषासुषमा

Text

## उपवाचकम्

Non-Detailed

&

## व्याकरणम्

Grammar

Board of Intermediate Education, Andhra Pradesh

Telugu and Sanskrit Akademi, Andhra Pradesh

# Intermediate

Second Year Text Book

# Sanskrit

**Pages : xx + 172 + iv**

© **Board of Intermediate Education**
**Andhra Pradesh.**

**Reprint**

**2023**

**Copies : 60,000**

- Published by Telugu and Sanskrit Akademi, Andhra Pradesh under the Centrally Sponsored Scheme of Production of Books and Literature in Regional Languages at the University level of the Government of India in the Ministry of Human Resource Development, New Delhi.

- All rights whatsoever in this book are strictly reserved and no portion of it may be reproduced by any process for any purpose without the written permission and prescribed by Board of Intermediate Education A.P. Vijayawada of the Copyright Owners.

Published, Printed & Distributed by
**Telugu and Sanskrit Akademi, A.P.**

Price Rs. : **95.00**

**Printed in India**

Laser Typeset by : **P.V. Ramana Murthy,** Rajamahendravaram

***Published and Printed by***

**GBR Offset Printers and Publisher**

Surampalli, Krishna Dist.,

on behalf of **Telugu and Sanskrit Akademi**, Andhra Pradesh



**Y.S. JAGAN MOHAN REDDY**

**CHIEF MINISTER**
**ANDHRA PRADESH**

**AMARAVATI**

# MESSAGE

I congratulate Akademi for starting its activities with printing of textbooks from the academic year 2021 – 22.

Education is a real asset which cannot be stolen by anyone and it is the foundation on which children build their future. As the world has become a global village, children will have to compete with the world as they grow up. For this there is every need for good books and good education.

Our government has brought in many changes in the education system and more are to come. The government has been taking care to provide education to the poor and needy through various measures, like developing infrastructure, upgrading the skills of teachers, providing incentives to the children and parents to pursue education. Nutritious mid-day meal and converting Anganwadis into pre-primary schools with English as medium of instruction are the steps taken to initiate children into education from a young age. Besides introducing CBSE syllabus and Telugu as a compulsory subject, the government has taken up numerous innovative programmes.

The revival of the Akademi also took place during the tenure of our government as it was neglected after the State was bifurcated. The Akademi, which was started on August 6, 1968 in the undivided state of Andhra Pradesh, was printing text books, works of popular writers and books for competitive exams and personality development.

Our government has decided to make available all kinds of books required for students and employees through Akademi, with headquarters at Tirupati.

I extend my best wishes to the Akademi and hope it will regain its past glory.

**(Y.S. Jagan Mohan Reddy)**

**Dr. Nandamuri Lakshmiparvathi**
M.A., M.Phil., Ph.D.
Chairperson, (Cabinet Minister Rank)
Telugu and Sanskrit Akademi, A.P.

## Message of Chairperson, Telugu and Sanskrit Akademi, A.P.

In accordance with the syllabus developed by the Board of Intermediate, State Council for Higher Education, SCERT etc., we design high quality Text books by recruiting efficient Professors, department heads and faculty members from various Universities and Colleges as writers and editors. We are taking steps to print the required number of these books in a timely manner and distribute through the Akademi's Regional Centers present across the Andhra Pradesh.

In addition to text books, we strive to keep monographs, dictionaries, dialect texts, question banks, contact texts, popular texts, essays, linguistics texts, school level dictionaries, glossaries, etc., updated and printed and made available to students from time to time.

For competitive examinations conducted by the Andhra Pradesh Public Service Commission and for Entrance examinations conducted by various Universities, the contents of the Akademi publications are taken as standard. So, I want all the students and Employees to make use of Akademi books of high standards for their golden future.

Congratulations and best wishes to all of you.

N. Lakshmiparvathi

**(Nandamuri Lakshmiparvathi)**
Chairperson Telugu and Sanskrit Academi, A.P

**J. SYAMALA RAO,** I.A.S.,
Principal Secretary to Government

**Higher Education Department**
Government of Andhra Pradesh

# MESSAGE

I Congratulate Telugu and Sanskrit Akademi for taking up the initiative of printing and distributing textbooks in both Telugu and English media within a short span of establishing Telugu and Sanskrit Akademi.

Number of students of Andhra Pradesh are competing of National Level for admissions into Medicine and Engineering courses. In order to help these students Telugu and Sanskrit Akademi consultation with NCERT redesigned their Textbooks to suit the requirement of National Level Examinations in a lucid language.

As the content in Telugu and Sanskrit Akademi books is highly informative and authentic, printed in multi-color on high quality paper and will be made available to the students in a time bound manner. I hope all the students in Andhra Pradesh will utilize the Akademi textbooks for better understanding of the subjects to compete of state and national levels.

**(J. SYAMALA RAO)**

# THE CONSTITUTION OF INDIA

## PREAMBLE

WE, THE PEOPLE OF INDIA, having solemnly resolved to constitute India into a [SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC] and to secure to all its citizens:

JUSTICE, social, economic and political;

LIBERTY of thought, expression, belief, faith and worship;

EQUALITY of status and of opportunity; and to promote among them all

FRATERNITY assuring the dignity of the individual and the [unity and integrity of the Nation];

IN OUR CONSTITUENT ASSEMBLY this twenty-sixth day of November, 1949 do HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.

# Text Book Development Committee-AP

## CHIEF EDITOR

**Prof. Gopala. Padmanabham**
Professor & Head, Dept. of Sanskrit
Sri Venkateswara University, Tirupati

## Editors & Course Writers

**Dr. M.V.N. Pavana Kumara Sarma**
Assistant Professor
Dept. of Apastamba Pourohitya
Sri Venkateswara Vedic University, Tirupati

**Dr. S.L.B Sankara Sarma**
Assistant Professor & Head
Dept. of Sanskrit, Govt. College for Women (A), Guntur

## Course Writers

**B.A.R.Viswanadham**
Junior Lecturer in Sanskrit
Govt. Junior College, Rajamahendravaram

**Dr. Y. Nagendramma**
Junior Lecturer in Sanskrit
Govt. Junior College For Men, Kadapa

## Coordinating Committee of Board of Intermediate Education, A.P.

**Sri M.V. Seshagiri Babu**, I.A.S.
**Secretary**
Board of Intermediate Education,
Andhra Pradesh

## Educational Research & Training Wing (Text Book)

**Dr. A. Srinivasulu**
Professor

**Sri. M. Ravi Sankar Naik**
Assistant Professor

**Dr. M. Ramana Reddy**
Assistant Professor

**Sri J.V. Ramana Gupta**
Assistant Professor

## Telugu and Sanskrit Akademi, Andhra Pradesh Coordinating Committee

**Sri V. Ramakrishna,** I.R.S.
Director

**Dr. M. Koteswaramma,** M.Com., Ph.D.
Research Officer

**Dr. S.A.T. Rajyalakshmi,** M.Sc., B.Ed., M.A., Ph.D.
Research Assistant

**Dr. K. Glory Sathyavani,** M.Sc., Ph.D., M.Ed.
Research Assistant

# सुरभाषासुथमा

## पुरोवाक

संस्कृतं नास दैपीवागन्वख्याता महर्षिभिः इति अमरवाण्या प्रशश्त्यं निरूपितम्, अपि तु रामायण-भारत- पुराणादिकं लौकिकवाङ्मयमपि तस्मिन् काले गीर्वाणवाण्यामेव अभिहितमासीत्। आधुनिककाले न मेवलं भारतीयविद्वांसः, पाश्चात्यपण्डिता अपि संस्कृतसाहित्यं सम्यक् परिशील्य तस्य वैशिष्ट्चं बहुधा प्रशाशंसुः। भारतीय संस्कृतिः संस्कृतभाषाम् आधारीकृत्यैब विस्तृतिं लेभे। तस्मात् संस्कृतभाषायाः अध्यनमत्यन्तमाबश्यकमिति निश्चप्रचम्।

अत एव अस्यां मुरभाषासुषमायां आर्षवाङ्मयादारभ्य आधुनिकवाङ्मयपर्यन्तं सुप्रसिद्धग्रन्येभ्यः संस्कारः, देशाभक्तिः धर्मनिष्ठा च बृद्धिं गच्छतीति सम्यातकवर्गस्य द्रढीयान् अर्वाचीनकविभ्यो धन्यवादांश्च निवेदयति। अत्र ग्रन्थे भागषट्कं वर्तते। यथा- पद्यभागः, गद्यभागः, उपवाचकम्, व्याकरणम्, शेमुषीपरीक्षा वाक्य-निर्माणं चेति।
अन्ते छात्राणाम् अध्यापकानां परीक्षकाणां च सौफर्य मनसिकृत्य अङ्कविभाजनं मानकप्रश्नपत्रं च न्यधायिषाताम् येन इतोऽधिकाः छात्राः संस्कृताध्ययने अभिरुचिं प्राप्नुयुः इति आशास्महे ।

**संस्कृतं संस्कृतेर्मूलं वर्धतामभिवर्धताम् ।**
**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।**
**जयतु संस्कृतम् - जयतु भारतम् ।**

**संपादक वर्गः**

# विषयसूची

## पद्दभाग


| | | |
|---|---|---|
| १. विभीषणोपदेशः | वाल्मीकि | 1 - 8 |
| २. धर्मनिष्ठा | काळिदास | 9 - 18 |
| ३. चाणक्य नीति शाश्त्रम | चाणक्यः | 19 - 23 |
| ४. सूक्तिनत्नानि | विभिन्नग्रन्येभ्यः | 24 - 28 |
| ५. सा मातृभूमिर्मम | म.म. दोर्बल.प्रभाकरशार्मा | 29 - 36 |
| ६. चित्रविंशति | जटाबह्लभुल. पुरूषोत्तमशाश्त्री | 37 - 44 |


## गद्दभागः


| | | |
|---|---|---|
| १. मन्तिषिसर्पकथा | नारायणपण्डितः | 47 - 53 |
| २. बिक्रमस्य औदार्यम् | शिबदासः | 54 - 63 |
| ३. राजवाहनजननम् | महाकविदण्डिः | 64 - 72 |
| ४. अपर्याप्तः समयः | आचार्य्र राणि. सदाशिवमूर्ति | 73 - 78 |
| ५. भिषजः भैषज्यम् | म.म. पुल्लेल. श्रीरामचन्द्रः | 79 - 86 |
| ६. अप्पय्यदीक्षितेन्द्र | डा. उषाराणि सङ्का | 87 - 95 |

## उपवाचकम्


| | | |
|---|---|---|
| १. कर्णभारम् | महाकवि भास | 99 - 111 |
| २. वज्रं वज्रेण भिधते | पण्डित ओगेटि परीक्षित् शर्मा | 112 - 124 |
| ३. मूर्खराजकम् | पूजालाल | 125 - 133 |


## शेमुषी परीक्षा


| | | |
|---|---|---|
| अभ्यासा | १ - ५ | 134 - 141 |


## उपवाचकम्


| | |
|---|---|
| १. शब्दाः | 145 - 154 |
| २. सन्धयः | 155 - 157 |
| ३. समासाः | 158 - 162 |
| ४. वाक्यनिर्माणम् | 163 - 166 |
| मानकप्रश्नपत्रम् | 167 - 172 |

## पद्यभागः


| | | |
|---|---|---|
| १. | विभीषणोपदेशः | - वाल्मीकिः |
| २. | धर्मनिष्ठा | - कालिदासः |
| ३. | चाणक्यनीतिशास्त्रम् | - चाणक्यः |
| ४. | सूक्तिरत्नानि | - विभिन्नग्रन्थेभ्यः |
| ५. | सा मातृभूमिर्मम | - म.म. दोर्बल.प्रभाकरशर्मा |
| ६. | चित्रविंशतिः | - जटावल्लभुल.पुरुषोत्तमशास्त्री |

# पद्यभागः

# १ विभीषणोपदेशः

वाल्मीकिमहर्षिः

## परिचयः

संस्कृतवङ्मये आदिकाव्यमिति प्रसिद्धं श्रीमद्रामायणं महर्षिणा वाल्मीकिना विरचितम्। श्रीमद्रामायणेऽस्मिन् काण्डसप्तकं वर्तते। तथा च-

**१. बालकाण्डः** **२. अयोध्याकाण्डः** **३. अरण्यकाण्डः**

**४. किष्किन्धकाण्डः** **५. सुन्दरकाण्डः** **६. युद्धकाण्डः**

**७. उत्तरकाण्डः**

चतुर्विंशतिसहस्रश्लोकात्मकेऽस्मिन् श्रीरामस्य चरितं वर्णितमस्ति।

### पाठ्यभागपरिचयः

अयं पाठ्यभागः युद्धकाण्डात् स्वीकृतः। अस्मिन् पाठ्यभगे सीतापहरणं कृतवते रावणाय विभीषणेन **प्रदीयतां दाशरथाय मैथिली**ति सदुपदेशः कृतः।।

**१. तान् गृहीतायुधान् सर्वान्वारयित्वा विभीषणः।**
**अब्रवीत् प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान्।।**

**२. अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते।**
**तस्य विक्रमकालांस्तान् युक्तानाहुर्मनीषिणः।।**

**३. प्रमत्तेष्वभियुक्तेषु दैवेन प्रहतेषु च।**
**विक्रमास्तात सिद्ध्यन्ति परीक्ष्य विधिना कृताः।।**

**४. बलान्यपरिमेयानि वीर्याणि च निशाचराः।**
**परेषां सहसावज्ञा न कर्तव्या कथञ्चन।।**

५.	खरो यद्यतिवृत्तस्तु स रामेण हतो रणे।
अवश्यं प्राणिना प्राणा रक्षितव्या यथा बलम्॥

६.	न तु क्षमं वीर्यवता तेन धर्मानुवर्तिना।
वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली॥

७.	प्रसादये त्वां बन्धुत्वात् कुरुष्व वचनं मम।
हितं तथ्यं त्वहं ब्रूमि दीयतामस्य मैथिली॥

८.	त्यजाशु कोपं सुखधर्मनाशनं
भजस्व धर्मं रतिकीर्तिवर्धनम्।
प्रसीद जीवेम सपुत्रबान्धवाः
प्रदीयतां दाशरथाय मैथिली ॥

९.	ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः।
राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः॥

१०.	यदा प्रभृति वैदेहि सम्प्राप्तेह परंतप।
तदा प्रभृति दृश्यन्ते निमित्तान्यशुभानि नः॥

११.	गवां पयांसि स्कन्नानि विमदा वरकुञ्जराः।
दीनमश्वाः प्रहेषन्ते नवग्रासाभिनन्दिनः॥

१२.	खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च।
न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः॥

१३.	वायसाः संघशः क्रूरा व्याहरन्ति समन्ततः।
समवेताश्च दृश्यन्ते विमानाग्रेषु संघशः॥

१४.	क्रव्यादानां मृगाणां च पुरीद्वारेषु संघशः।
श्रूयन्ते विपुला घोषाः सविस्फूर्जितनिःस्वनाः॥

१५. इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया।
तत्रापि च महाराज न दोषं कर्तुमर्हसि ।।

१६. अयं हि दोषः सर्वस्य जनस्यास्योपलक्ष्यते।
रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च ।।

१७. अवश्यं च मया वाच्यं यद्दृष्टमथवा श्रुतम् ।
संविधाय यथान्यायं तद् भवान् कर्तुमर्हति।।

१८. वृतो हि बाह्वन्तरभोगराशि-
श्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः।
पञ्चाङ्गुलीपञ्चशिरोऽतिकायः
सीतामहाहिस्तव केन राजन् ।।

१९. जीवंस्तु रामस्य न मोक्ष्यसे त्वं
गुप्तः सवित्रापि अथवा मरुद्भिः ।
न वासवस्याङ्कगतो न मृत्यो-
र्नभो न पातालमनुप्रविष्टः ।।

२०. अयं च राजा व्यसनाभिभूतो
मित्रैरमित्रप्रतिमैर्भवद्भिः।
अन्वास्यते राक्षसनाशनार्थे
तीक्ष्णः प्रकृत्या ह्यसमीक्षकारि ।।

२१. परस्य वीर्यं स्वबलं च बुद्ध्वा
स्थानं क्षयं चैव तथैव वृद्धिम् ।
तथा स्वपक्षेऽप्यनुमृश्य बुद्ध्या
वदेत् क्षमं स्वामिहितं च मन्त्री।।

२२. को ब्रह्मदण्डप्रतिमप्रकाशान्
अर्चिष्मतः कालनिकाशरूपान् ।

सहेतबाणान् यमदण्डकल्पान्
समक्षमुक्तान् युधि राघवेण ।।

२३. धनानि रत्नानि सुभूषणानि
वासांसि दिव्यानि मणींश्च चित्रान्।
सीतां च रामाय निवेद्य देवीं
वसेम राजन् इह वीतशोकाः ।।

२४. योऽन्यस्त्वेवं विधं ब्रूयात् वाक्यमेतन्निशाचर।
अस्मिन्मुहूर्ते न भवेत् त्वां तु धिक् कुलपांसन।।

२५. अब्रवीच्च तथा वाक्यं जातक्रोधो विभीषणः।
अन्तरिक्षगतः श्रीमान् भ्राता वै राक्षसाधिपम्।।

२६. स त्वं भ्राताऽसि मे राजन् ब्रूहि मां यद्यदिच्छसि ।
ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः ।।
इदं हि परुषं वाक्यं न क्षमाम्यग्रजस्य ते।।

२७. सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।।

२८. शूराश्च बलवन्तश्च कृतास्त्राश्च नरा रणे।
कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः।।

२९. आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम्।
स्वस्ति तेऽस्तु गमिष्यामि सुखीभव मया विना।।

३०. निवार्यमाणस्य मया हितैषिणा
न रोचते ते वचनं निशाचर।
परीतकाले हि गतायुषो नरा
हितं न गृह्णन्ति सुहृद्भिरीरितम्।।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. विभीषणोपदेशः इति पाठ्यभागसारांशं लिखत?

२. रावणाय विभीषणेन कृतमुपदेशं लिखत?

### २. लघुसमाधानप्रश्नाः

१. कदा प्रभृति अशुभानि निमित्तानि दृश्यन्ते?

२. सीता कीदृशी?

३. नराः क इव रणे सीदन्ति?

### ३. एकपदसमाधानप्रश्नाः

१. रणे रामेण कः हतः?

२. केषां बलानि अमेयानि?

३. सुखधर्मनाशनं केन भवति?

### ४. सन्दर्भवाक्यानि

१. परेषां सहसावज्ञा न कर्तव्या कथञ्चन।

२. वदेत् क्षमं स्वामिहितं मन्त्री।

३. अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।

## विशेषतो ज्ञेयाः

### ५. कठिनशब्दार्थाः

१. मनीषिणः - विद्वांसः

२. विधिना - शास्त्रेण, दैवेन

३. अवज्ञा - अनादरः

| | |
|---|---|
| ४. वेश्म | - गृहम् |
| ५. आशु | - शीघ्रम् |
| ६. क्रव्यादानाम् | - मांसभक्षकाणाम् |
| ७. स्कन्नानि | - शुष्काणि |
| ८. हिमदाः | - मदरहिताः |
| ९. न क्षमामि | - न सहे |
| १०. सीदन्ति | - नश्यन्ति |
| ११. समन्ततः | - सर्वतः |
| १२. परीतकाले | - विपरीतकाले |
| १३. ईरितम् | - उक्तम् |

## व्याकरणांशाः

### ६. सन्धयः

| | | | |
|---|---|---|---|
| गृहीत+आयुधान् | = गृहीतायुधान् | - | सवर्णदीर्घसन्धिः |
| प्राञ्जलिः+वाक्यम् | = प्राञ्जलिर्वाक्यम् | - | विसर्गसन्धिः |
| प्रति+उपवेश्य | = प्रत्युपवेश्य | - | यणादेशसन्धिः |
| अपि+उपायैः | = अप्युपायैः | - | यणादेशसन्धिः |
| प्रमत्तेषु+अभियुक्तेषु | = प्रमत्तेष्वभियुक्तेषु | - | यणादेशसन्धिः |
| सहसा+अवज्ञा | = सहसावज्ञा | - | सवर्णदीर्घसन्धिः |
| स्वपक्षे+अपि | = स्वपक्षेऽपि | - | पूर्वरूपसन्धिः |
| खर+उष्ट्राश्वतराः | = खरोष्ट्राश्वतराः | - | गुणसन्धिः |

## ७. समासाः

| | | |
|---|---|---|
| **यथाबलम्** | - बलमनतिक्रम्य | - अव्ययीभावसमासः |
| **भीमकर्मा** | - भीमं कर्म यस्य सः | - बहुव्रीहिसमासः |
| **धर्मानुवर्तिना** | - धर्ममनुवर्तते इति धर्मानुवर्ती, तेन | - कृद्वृत्तिः |
| **सुखधर्मसाधनम्** | - सुखं च धर्मश्च सुखधर्मौ | - द्वन्द्वसमासः |
| | सुखधर्मयोस्साधनम् - सुखधर्मसाधनम् | - षष्ठीतत्पुरुषसमासः |
| **रतिकीर्तिवर्धनम्** | - वर्धयतीति वर्धनम् | - कृद्वृत्तिः |
| | रतिश्च कीर्तिश्च रतिकीर्ती | - द्वन्द्वसमासः |
| | रतिकीर्त्योः वर्धनम् | - षष्ठीतत्पुरुषसमासः |
| **प्राप्तधर्मार्थनिश्चयः** | - धर्मश्च अर्थश्च धर्मार्थौ | - द्वन्द्वसमासः |
| | धर्मार्थयोः निश्चयः- धर्मार्थनिश्चयः | - षष्ठीतत्पुरुषसमासः |
| | प्राप्तः धर्मार्थनिश्चयः येन सः | - बहुव्रीहिसमासः |
| **व्यसनाभिभूतः** | - व्यसनेन अभिभूतः | - तृतीयातत्पुरुषसमासः |
| **असमीक्षकारि** | - समीक्षां करोतीति समीक्षकारि | - उपपदसमासः |
| | न समीक्षकारि असमीक्षकारि | - नञ् तत्पुरुषसमासः |
| **कालाभिपन्नाः** | - कालेन अभिपन्नाः | - तृतीयातत्पुरुषसमासः |
| **कृतास्त्राः** | - कृतम् अस्त्रं यैः ते | - बहुव्रीहिसमासः |
| **निशाचराः** | - निशायां चरन्तीति | - सप्तमीतत्पुरुषसमासः |
| **वीतशोकाः** | - वीतः शोकः येषां ते | - बहुव्रीहिसमासः |
| **जातक्रोधः** | - जातः क्रोधः यस्य सः | - बहुव्रीहिसमासः |
| **बाह्वन्तरभोगराशिः** | - भोगस्य राशिः- भोगराशिः | - षष्ठीतत्पुरुषसमासः |
| | बाह्वन्तरे भोगराशिः यस्य सः | - बहुव्रीहिसमासः |

| | | |
|---|---|---|
| **सुस्मिततीक्ष्णदंष्ट्रः** | - शोभनं च तत् स्मितं च सुस्मितम् | - कर्मधारयसमासः |
| | तीक्ष्णाश्च ताः दंष्ट्राश्च - तीक्ष्णदंष्ट्राः | - कर्मधारयसमासः |
| | सुस्मितमेव तीक्ष्णदंष्ट्राश्च - सुस्मिततीक्ष्णदंष्ट्राः | - अ.पू.कर्मधारयः |
| | सुस्मितं तीक्ष्णदंष्ट्राः यस्य सः - सुस्मिततीक्ष्णदंष्ट्रः | - बहुव्रीहिसमासः |
| **पञ्चाङ्गुली** | - पञ्च अङ्गुल्यः यस्य सः | - बहुव्रीहिसमासः |
| **पञ्चशिराः** | - पञ्च शिरांसि यस्य सः | - बहुव्रीहिसमासः |
| **अतिकायः** | - कायम् अतिक्रान्तः | - द्वितीयातत्पुरुषसमासः |
| **सीतामहाहिः** | - महान् असौ अहिश्च - महाहिः | - कर्मधारयसमासः, |
| | सीता एव महाहिः - सीतामहाहिः | - अ.पू.कर्मधारयः |

## ८. धातुरूपाणि

अब्रवीत् अब्रूताम् अब्रुवन् - ब्रूञ् व्यक्तायां वाचि - लङ्- प्रथमपुरुषैकवचनम्

प्रदीयतां प्रदीयेतां प्रदीयन्ताम्- डुदाञ् दाने - कर्मणि लोट्- प्रथमपुरुषैकवचनम्

प्रहेषते प्रहेषेते प्रहेषन्ते - हेषृ - अव्यक्ते शब्दे - लट्- प्रथमपुरुषैकवचनम्

श्रूयते श्रूयेते श्रूयन्ते - श्रु श्रवणे- कर्मणि लट् - प्रथमपुरुषैकवचनम्

वदेत् वदेतां वदेयुः- वद-व्यक्तायां वाचि- विधि लिङ् - प्रथमपुरुषैकवचनम्

सहेत सहेयातां सहेरन्- क्षमूष् सहने - विधि लिङ् - प्रथमपुरुषैकवचनम्

ब्रूयात् ब्रूयाताम् ब्रूयुः - ब्रूञ् व्यक्तायां वाचि - विधि लिङ् - प्रथमपुरुषैकवचनम्

गृह्णाति गृह्णीतः गृह्णन्ति - ग्रह उपादाने - लट् - प्रथमपुरुषैकवचनम्

# २ धर्मनिष्ठा

महाकविकालिदासः

## परिचयः

कालिदासः, संस्कृतसाहित्ये वाल्मीकि-व्यास-भासानाम् अनन्तरकलीनः महाकविः। अयं कविकुलगुरुः इति, कविकुलतिलकः इति च साहित्यकारैः आद्रियते। अयं कालिदासः १. रघुवंशम् , २. कुमारसम्भवम् इति द्वे महाकाव्ये, १. ऋतुसंहारः, २. मेघसन्देशम् इति द्वे लघुकाव्ये, १. मालविकाग्निमित्रम् , २. विक्रमोर्वशीयम् , ३. अभिज्ञानशाकुन्तलम्, इति त्रीणि रूपकाणि च रचितवान्। संस्कृतसाहित्ये कालिदासविषये **उपमा कालिदासस्य** इति ख्यातिः अस्ति। अस्य कवित्वं सरसम्, सरलम् सुन्दरं च।

### पाठ्यभागपरिचयः

प्रकृते **धर्मनिष्ठा** इत्ययं पद्यपाठ्यभागः रघुवंशमहाकाव्ये द्वितीयसर्गात् संगृहीतः। पाठेऽस्मिन् सूर्यवंशीयेषु अन्यतमेन दिलीपमहाराजेन अनुष्ठितं वसिष्ठहोमधेनोः नन्दिन्याः रक्षणं निरूपितम्। तथा च कुलगुरोः वसिष्ठस्य आदेशपालनम्, कर्तव्यनिष्ठा, भूतानुकम्पा इत्यादयः दिलीपस्य गुणाः सम्भाषणशैल्या साधु उपवर्णिताः।

### पूर्वकथा

सन्तानार्थाय विधये सुदक्षिणादिलीपौ कुलगुरोः वसिष्ठस्य आश्रमम् आगच्छतः। वसिष्ठमहर्षिः तौ सुदक्षिणादिलीपौ प्रति नन्दिनीधेनोः सेवां कर्तुम् आदिशति। नन्दिन्याः सेवायां सुदक्षिणादिलीपयोः एकविंशतिदिनानि अतीतानि। तदनन्तरकथांश एव प्रस्तुतपाठ्यभागः।

## पाठ्यभागः

१. इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्तेः।
सप्त व्यतीयुः त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य॥

२. अन्येद्युरात्मानुचरस्य भावं
जिज्ञासमाना मुनिहोमधेनुः।
गङ्गाप्रपातान्तविरूढघासं
गौरीगुरोः गह्वरमाविवेश॥

३. सा दुष्प्रधर्षा मनसापि हिंस्रैः
इत्यद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनो नृपेण
प्रसह्य सिंहः किल तां चकर्ष॥

४. तदीयमाक्रन्दितमार्तसाधोः
गुहानिबद्धप्रतिशब्ददीर्घम्।
रश्मिष्विवादाय नगेन्द्रसक्तां
निवर्तयामास नृपस्य दृष्टिम्॥

५. ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिः निषङ्गात्
उद्धर्तुमैच्छत् प्रसभोद्धृतारिः॥

६. वामेतरस्तस्य करः प्रहर्तुः
नखप्रभाभूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥

७. तमार्यगृह्यं निगृहीतधेनुः
मनुष्यवाचा मनुवंशकेतुम्।
विस्माययन् विस्मितमात्मवृत्तौ
सिंहोरुसत्त्वं निजगाद सिंहः॥

८. अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्छति मारुतस्य॥

९. कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि मां किंकरमष्टमूर्तेः
कुम्भोदरं नाम निकुम्भतुल्यम्॥

१०. अमुं पुरः पश्यसि देवदारुम्
पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भ-स्तन-निस्सृतानां
स्कन्दस्य मातुः पयसां रसज्ञः॥

११. कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः॥

१२. तदा प्रभृत्येव वनद्विपानां
त्रासार्थमस्मिन्नहमद्रिकुक्षौ।
व्यापारितः शूलभृता विधाय
सिंहत्वमङ्कागतसत्त्ववृत्ति॥

१३. तस्यालमेषा क्षुधितस्य तृप्त्यै
प्रदिष्टकाला परमेश्वरेण।
उपस्थिता शोणितपारणा मे
सुरद्विषः चान्द्रमसी सुधेव॥

१४. स त्वं निवर्तस्व विहाय लज्जां
गुरोर्भवान् दर्शितशिष्यभक्तिः।
शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति॥

१५. इति प्रगल्भं पुरुषाधिराजः
मृगाधिराजस्य वचो निशम्य।
प्रत्याहतास्त्रः गिरिशप्रभावात्
आत्मन्यवज्ञां शिथिलीचकार॥

१६. प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्वसङ्गे वितथप्रयत्नः।
जडीकृतः त्र्यम्बकवीक्षणेन
वज्रं मुमुक्षन्निव वज्रपाणिः॥

१७. संरुद्धचेष्टस्य मृगेन्द्रकामं
हास्यं वचस्तद्यदहं विवक्षुः।
अन्तर्गतं प्राणभृतां हि वेद
सर्वं भवान् भावमतोऽभिधास्ये॥

१८. मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहिताग्नेः
नश्यत्पुरस्तादनुपेक्षणीयम्॥

१९. स त्वं मदीयेन शरीरवृत्तिम्
देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा
विसृज्यतां धेनुरियं महर्षेः।।

२०. अथाऽन्धकारं गिरिगह्वराणां
दंष्ट्रामयूखैः शकलानि कुर्वन्।
भूयः स भूतेश्वरपार्श्ववर्ती
किंचिद्विहस्यार्थपतिं बभाषे।।

२१. एकातपत्रं जगतः प्रभुत्वम्
नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोः बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम्।।

२२. भूतानुकम्पा तव चेदियं गौः
एका भवेत्स्वस्तिमती त्वदन्ते।
जीवन्पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ! पितेव पासि।।

२३. तद्रक्षकल्याणपरंपराणां
भोक्तारमूर्जस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रभिन्नम्
ऋद्धं हि राज्यं पदमैन्द्रमाहुः।।

२४. निशम्य देवानुचरस्य वाचं
मनुष्यदेवः पुनरप्युवाच।
धेन्वा तदध्यासितकातराक्ष्या
निरीक्ष्यमाणः सुतरां दयालुः।।

२५. क्षतात्किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैः उपक्रोशमलीमसैर्वा।।

२६. कथं नु शक्योऽनुनयो महर्षेः
विश्राणनाच्चान्यपयस्विनीनाम्।
इमामनूनां सुरभेरवेहि
रुद्रौजसा तु प्रहृतं त्वयास्याम्।।

२७. सेयं स्वदेहार्पणनिष्क्रयेण
न्याय्या मया मोचयितुं भवत्तः।
न पारणा स्यात् विहता तवैवं
भवेदलुप्तश्च मुनेः क्रियार्थः।।

२८. भवानपीदं परवानवैति
महान् हि यत्नः तव देवदारौ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे
विनाश्य रक्ष्यं स्वयमक्षतेन।।

२९. किमप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानाम्
पिण्डेष्वनास्था खलु भौतिकेषु ।।

३०. तथेति गाम् उक्तवते दिलीपः
सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्त शस्त्रो हरये स्वदेहम्
उपानयत् पिण्डमिवामिषस्य ।।

३१. तस्मिन्क्षणे पालयितुः प्रजानाम्
उत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता॥

३२. इत्थं क्षितीशेन वसिष्ठधेनुः
आराधिता प्रीततरा बभूव।
तदन्विता हैमवतात् च कुक्षेः
प्रत्याययावाश्रममश्रमेण॥

## अभ्यासः

### १. निबन्धप्रश्नौ

१. धर्मनिष्ठा इति पाठ्यांशस्य साराशं संक्षेपेण लिखत?

२. क्षितीशेन वसिष्ठधेनुः कथं आराधिता? विशदयत?

३. दलीपस्य धर्मनिष्ठामधिकृत्य लिखत?

### २. लघुसमाधानप्रश्नाः

१. सुदक्षिणादिलीपौ किमर्थं नन्दिनीधेनोः सेवाम् अकरुताम्?

२. दिलीपेन सेव्यमानं नन्दिनीधेनुं कः चकर्ष?

३. धर्मनिष्ठा इति पाठ्यांशः कस्मात् संगृहीतः?

## ३. एकपदसमाधानप्रश्नाः

१. रघुवंशमहाकाव्यं केन विरचितम्?

२. दिलीपस्य धर्मपत्नी का?

३. मुनिहोमधेनुः का?

## ४. सन्दर्भवाक्यानि

१. चित्रार्पितारम्भ इवाऽवतस्थे।

२. राज्येन किं तद्विपरीतवृत्तेः, प्राणैः उपक्रोशमलीमसैर्वा।

३. पिण्डेष्वनास्था खलु भौतिकेषु।

## विशेषतो ज्ञेयाः

## ६. सन्धयः

| | | |
|---|---|---|
| १. इव + अवतस्थे | = इवावतस्थे | - सवर्णदीर्घसन्धिः |
| २. चित्र + अर्पित | = चित्रार्पित | - सवर्णदीर्घसन्धिः |
| ३. मनसा + अपि | = मनसापि | - सवर्णदीर्घसन्धिः |
| ४. दीन + उद्धरण | = दीनोद्धरण | - गुणसन्धिः |
| ५. पादप + उन्मूलन | = पादपोन्मूलन | - गुणसन्धिः |
| ६. वाम + इतर | = वामेतर | - गुणसन्धिः |
| ७. पिता + इव | = पितेव | - गुणसन्धिः |
| ८. तथा + इति | = तथेति | - गुणसन्धिः |

| | | |
|---|---|---|
| ९. तव + एवम् | = तवैवम् | - वृद्धिसन्धिः |
| १०. च + एनम् | = चैनम् | - वृद्धिसन्धिः |
| ११. अथ + एनम् | = अथैनम् | - वृद्धिसन्धिः |
| १२. इति +अद्रिशोभा | = इत्यद्रिशोभा | - यणादेशसन्धिः |
| १३. प्रभृति + एव | = प्रभृत्येव | - यणादेशसन्धिः |
| १४. पिण्डेषु+अनास्था | = पिण्डेष्वनास्था | - यणादेशसन्धिः |
| १५. वपुः+ च | = वपुश्च | - विसर्गसन्धिः |
| १६. गुरोः + अपि | = गुरोरपि | - विसर्गसन्धिः |
| १७. अद्रेः + तनयाम् | = अद्रेस्तनयाम् | - विसर्गसन्धिः |
| १८. अतः+अभिधास्ये | = अतोऽभिधास्ये | - विसर्गसन्धिः |
| १९. पुत्रीकृतः+असौ | = पुत्रीकृतोऽसौ | - विसर्गसन्धिः |
| २०. वचः + निशम्य | = वचो निशम्य | - विसर्गसन्धिः |

## ७. समासाः

| | | |
|---|---|---|
| १. **मुनिहोमधेनुः** | - मुनेः होमधेनुः | - षष्ठीतत्पुरुषसमासः |
| २. **होमधेनुः** | - हेमाय धेनुः | - चतुर्थीतत्पुरुषसमासः |
| ३. **वंशस्य केतुः** | - वंशकेतुः | - षष्ठीतत्पुरुषसमासः |
| ४. **मनुवंशकेतुः** | - मनोः वंशकेतुः | - षष्ठीतत्पुरुषसमासः |
| ५. **वसिष्ठधेनुः** | - वसिष्ठस्य धेनुः | - षष्ठीतत्पुरुषसमासः |
| ६. **क्षितिपालः** | - क्षितेः पालः | - षष्ठीतत्पुरुषसमासः |
| ७. **अर्थपतिम्** | - अर्थस्य पतिः, तम् | - षष्ठीतत्पुरुषसमासः |
| ८. **भूतानुकम्पा** | - भूतेषु अनुकम्पा | - सप्तमीतत्पुरुषसमासः |

| | | |
|---|---|---|
| ९. **महीपालः** | - मह्याः पालः | - षष्ठीतत्पुरुषसमासः |
| १०. **वनद्विपाः** | - वने द्विपाः | - सप्तमीतत्पुरुषसमासः |
| ११. **पार्श्वद्रुमाः** | - पार्श्वयोः द्रुमाः | - सप्तमीतत्पुरुषसमासः |
| १२. **अनिन्दितः** | - न निन्दितः | - नञ् तत्पुरुषसमासः |
| १३. **अक्षतेन** | - न क्षतः, तेन | - नञ् तत्पुरुषसमासः |
| १४. **स्थावरजङ्गमाः** | - स्थावराश्च जङ्गमाश्च | - द्वन्द्वसमासः |
| १५. **दुष्टसत्त्वान्** | -दुष्टाश्च ते सत्त्वाश्च, तान् | - विशेषणपूर्वपदकर्मधारयः |
| १६. **कैलास इव गौरं** | - कैलासगौरम् | - उपमानपूर्वपदकर्मधारयः |
| १७. **यशश्शरीरे** | -यशः एव शरीरम्, तस्मिन् | - अवधारणापूर्वपदकर्मधारयः |
| १८. **अष्टमूर्तेः** | - अष्टाः मूर्तयः यस्य सः, तस्य | - बहुव्रीहिसमासः |
| १९. **वृषभध्वजेन** | - वृषभः ध्वजे यस्य सः, तेन | - बहुव्रीहिसमासः |
| २०. **अनिन्दितात्मा** | - अनिन्दितः आत्मा यस्य सः | - बहुव्रीहिसमासः |

# ३ चाणक्यनीतिशास्त्रम्

चाणक्यः

## परिचयः

प्रपञ्चे अतिपुरातननागरिकतायाः संस्कृतेश्च निलयः भारतदेशः। तत्तत् देशवासिनां वेषभाषाः, अचारव्यवहाराः, कुटुम्बजीवनविधानम्, राज्यपालनविधानम् इत्यादयः बाह्यविषयाः नागरिकतेति नाम्ना व्यपदिश्यन्ते। व्यक्तीनाम् अभिरुचयः, परस्पर-सम्बन्धविशेषाः, आध्यात्मिकज्ञानसम्पत् इत्येवमादयो आन्तरङ्गिकविषयाः संस्कृतिरिति च व्यवह्रियन्ते। नागरिकता, संस्कृतिः इति द्वे अपि अस्मिन् देशे महदुन्नतिं प्राप्य विराजेते। देशे पौराणां योगक्षेमादीनां प्राधान्यं ददत्, कल्पितं राज्यपालनविधानं चाणक्यस्य नीतिशास्त्रे परिदृश्यते। एतादृशं पालनविधानं नागरिकतायाः महदौन्नत्यं ज्ञापयति।

चाणक्यः क्रीस्तोः पूर्वं ४०० संवत्सरसमीपकाले आसीदिति ऐतिहासिकाः अभिप्रयन्ति। अस्यैव विष्णुगुप्तः कौटिल्यः इत्यादीनि नामान्तराण्यपि वर्तन्ते। चणकपुत्रत्वात् चाणक्य इति अयं व्यवहरति। अर्थार्जने कुटिलानुपायान् अयमपदिशतीति कारणेन कौटिल्य इति प्रसिद्धिं प्राप्तवान्। चाणक्यः चन्द्रगुप्तस्य महामात्य आसीत्।

चाणक्यः एव राजनीतिसूत्राणीति नाम्ना, अष्टसु अध्यायेषु ५६२ सूत्राणि रचितवान् इति प्रसिद्धिः। लघुचाणक्यम्-वृद्धचाणक्यम्-चाणक्यनीतिः-चाणक्यराजनीतिः-चाणक्यनीतिशास्त्रम् इति व्यवह्रियमाणानां सर्वेषामपि सूत्राणां एतानि चाणक्यसूत्राण्येव मूलभूतानि। तान्याधारीकृत्य केचनश्लोकग्रन्थाः आगताः। तेषु अन्यतमात् स्वीकृतोऽयं पाठ्यभागः। अयं पाठ्यभागः जीवने आवश्यकान् मानवीयाननेकानंशान् अवबोद्धुं महता उपकरिष्यति।

**सूचना-** अत्र ❋ चिह्निताः प्रतिपदार्थभावबोधपूर्वकं कण्ठस्थीकरणीयाः।

## पाठ्यभागः

१. सत्येन धार्यते पृथिवी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥

२. सर्वौषधीनाममृतं प्रधानं
सर्वेषु सौख्येष्वशनं प्रधानम्।
सर्वेन्द्रियाणां नयनं प्रधानं
सर्वेषु गात्रेषु शिरः प्रधानम्॥

३. धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्॥

४. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥

५. विद्वान् प्रशस्यते लोके विद्वान् गच्छति गौरवम्।
विद्यया लभ्यते सर्वं विद्या सर्वत्र पूज्यते॥

६. विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च॥

७. वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम्।
वृथा दानं धनाढ्येषु वृथा दीपो दिवापि च॥

८. मूर्खः चिरायुः जातोऽपि तस्माज्जातमृतो वरः।
मृतः स चाल्पदुःखाय यावज्जीवं जडो दहेत्॥

९. एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं तथा॥

१०. एकेन शुष्कवृक्षेण दह्यमानेन वह्निना।
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं तथा॥

११. किं जातैः बहुभिः पुत्रैः शोकसन्तापकारकैः।
वरमेकः कुलालम्बी यत्र विश्राम्यते कुलम्॥

१२. पादाभ्यां न स्पृशेदग्निं गुरुं पण्डितमेव च।
नैव गां न कुमारीं च न वृद्धं न शिशुं तथा॥

१३. शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने॥

❋ १४. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥

१५. जले तैलं खले गुह्यं पात्रे दानं मनागपि।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः॥

१६. प्रस्तावसदृशं वाक्यं प्रभावसदृशं प्रियम्।
आत्मशक्तिसमं कोपं यो जानाति स पण्डितः॥

❋ १७. तक्षकस्य विषं दन्ते मक्षिकायास्तु मस्तके।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम् ॥

१८. त्यज दुर्जनसंसर्गं भज साधुसमागमम्।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम्॥

१९. दानेन पाणिः न तु कङ्कणेन
स्नानेन शुद्धिः न तु चन्दनेन।
मानेन तृप्तिः न तु भोजनेन
ज्ञानेन मुक्तिः न तु मण्डनेन॥

२०. दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः॥

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. सर्वेन्द्रियाणां प्रधानं किम्?

२. पृथिव्यां त्रीणि रत्नानि कानि?

३. व्याधितस्य मित्रं किम्?

### २. एकपदसमाधानप्रश्नाः

१. सर्वत्र का पूज्यते?

२. यावज्जीवं कः दहेत्?

३. कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

## विशेषतो ज्ञेयाः

### ३. सन्धयः

| | | | |
|---|---|---|---|
| १. दिवा + अपि | = दिवापि | - सवर्णदीर्घसन्धिः |
| २. एकेन + अपि | = एकेनापि | - सवर्णदीर्घसन्धिः |
| ३. यदि + इच्छति | = यदीच्छति | - सवर्णदीर्घसन्धिः |
| ४. च + अल्पदुःखाय | = चाल्पदुःखाय | - सवर्णदीर्घसन्धिः |

| | | |
|---|---|---|
| ५. सर्व + अङ्गे | = सर्वाङ्गे | - सवर्णदीर्घसन्धिः |
| ६. न + एव | = नैव | - वृद्धिसन्धिः |
| ७. सर्व + औषधीनाम् | = सर्वौषधीनाम् | - वृद्धिसन्धिः |
| ८. सर्व + इन्द्रियाणाम् | = सर्वेन्द्रियाणाम् | - गुणसन्धिः |
| ९. सौख्येषु + अशनम् | = सौख्येष्वशनम् | - यणादेशसन्धिः |
| १०. मनाक् + अपि | = मनागपि | - जश्त्वसन्धिः |
| ११. यावद् +जीवम् | = यावज्जीवम् | - श्चुत्वसन्धिः |
| १२. तत् + वनम् | = तद्वनम् | - जश्त्वसन्धिः |
| १३. एकः + हि | =एको हि | - विसर्गसन्धिः |
| १४. जातः + अपि | = जातोऽपि | - विसर्गसन्धिः |
| १५. मक्षिकायाः तु | = मक्षिकायास्तु | - विसर्गसन्धिः |
| १६. साधवः + न | = साधवो न | - विसर्गसन्धिः |
| १७. धर्मः + मित्रम् | = धर्मो मित्रम् | - विसर्गसन्धिः |

## ४. समासाः

| | | |
|---|---|---|
| १. **विद्यायुक्तः** | - विद्यया युक्तः | - तृतीयातत्पुरुषसमासः |
| २. **दुर्जनसंसर्गः** | - दुर्जनस्य संसर्गः | - षष्ठीतत्पुरुषसमासः |
| ३. **साधुसमागमः** | - साधोः समागमः | - षष्ठीतत्पुरुषसमासः |
| ४. **कार्यहन्ता** | - कार्यस्य हन्ता | - षष्ठीतत्पुरुषसमासः |
| ५. **आत्मशक्तिः** | - आत्मनः शक्तिः | - षष्ठीतत्पुरुषसमासः |
| ६. **अनित्यताम्** | - न नित्यताम् | - नञ् तत्पुरुषसमासः |
| ७. **शुष्कवृक्षः** | - शुष्कश्चासौ वृक्षश्च | - विशेषणपूर्वपदकर्मधारयसमासः |
| ८. **जातमृतः** | - जातश्चासौ मृतश्च | - विशेषणपूर्वपदकर्मधारयसमासः |

# ४ सूक्तिरत्नानि

विविधग्रन्थेभ्यः उद्धृतानि

## परिचयः

संसकृतसाहित्ये नीतिग्रन्थानां सुमहत् स्थानं वर्तते। नीतिशास्त्रग्रन्थाः बहवः विरचिताः सन्ति। काव्य-पुराण-इतिहासेषु प्रसङ्गानुगुणं तत्तत्सन्दर्भेषु नीतिबोधनं कृतम्। मानवीयमनसः सदालोचनाभ्यसनम्, बोधनम् कर्तव्यनिर्देशनं च नीतेः मुख्यम् लक्ष्यम्। संस्कृतसाहित्ये तत्र तत्र तैः तैः कविभिः प्रङ्गवशात् कृतं तत्तन्नीतिबोधनम् आधुनिककलाशालाविद्यार्थिनां व्यक्तित्वविकासाय, आत्मविश्वासवर्धनाय, निर्णयस्वीकाराय, कार्यानुष्ठानाय, मानवीय-प्रमाणानाम् अवगमनाय अभ्यसनाय च बहु उपकरोति इति मत्वा प्रकीर्णतया स्थिताः केचन श्लोकाः अत्र प्रस्तुताः। विद्यार्थिनः तान् एतान् श्लोकान् पठित्वा अवगत्य च देश-काल-पात्रतादेः औचित्यं जानीयुरिति आशास्महे।

**सूचना-** अत्र ❃ चिह्निताः प्रतिपदार्थभावबोधपूर्वकं कण्ठस्थीकरणीयाः।

## पाठ्यभागः

❃ १. **प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।**
**तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति॥**

२. **वरमेको गुणी पुत्रः न च मूर्खशतैरपि।**
**एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः॥**

❃ ३. **उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।**
**षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥**

४. आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधः तथात्मा गुणदोषयोः॥

५. आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि सुहृद् भवेत्॥

❋ ६. अर्थानामार्जनं कार्यं वर्धनं रक्षणं तथा।
भक्ष्यमाणो निरादायः सुमेरुरपि हीयते॥

७. दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं दुर्लभमेतत् चतुर्विधं भद्रम्॥

८. खलः सर्षपमात्राणि परछिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥

९. कृपणेन समो दाता न भूतो न भविष्यति।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति॥

१०. रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गः चरणविकलः सारथिरपि।
रविर्यान्त्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्वे वसति महतां नोपकरणे॥

११. कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥

१२. सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा।
अहं करोमीति वृथाऽभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः॥

१३. सुखस्याऽनन्तरं दुःखं
दुःखस्याऽनन्तरं सुखम्।
न नित्यं लभते दुःखं
न नित्यं लभते सुखम्॥

१४. स्वधर्मरूपो राजेन्द्रः दयारूपेण मन्त्रिणः।
सेवकाः साधुरूपेण यथा राजा तथा प्रजाः॥

१५. शरीरे जर्जरीभूते व्याधिग्रस्ते कलेबरे।
औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः॥

१६. मूर्खस्य पञ्च चिह्नानि गर्वी दुर्वचनी तथा।
हठी चाप्रियवादी च परोक्तं नैव मन्यते॥

१७. माता निन्दति नाभिनन्दति पिता भ्राता न सम्भाषते
भृत्यः कुप्यति नानुगच्छति सुतः भार्या च नालिङ्गते।
अर्थप्रार्थनशङ्कया न कुरुतेऽप्यालापमात्रं सुहृत्
तस्मात् द्रव्यमुपार्जयाऽशु सुमते! द्रव्येण सर्वे वशाः॥

१८. प्रातःस्नानं गवां सेवा आरामः पुष्पवाटिका।
मातापित्रोश्च शुश्रूषा शास्त्राय च सुखाय च॥

१९. पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु।
लुब्धेन सञ्चितं द्रव्यं समूलं च विनश्यति॥

✽ २०. परोपदेशसमये जनाः सर्वेऽपि पण्डिताः।
तदनुष्ठानसमये मुनयोऽपि न पण्डिताः॥

## अभ्यासः

### १. लघुसमाधानप्रश्ना:

१. परोपदेशसमये जनाः सर्वेऽपि कीदृशाः भवन्ति।

२. अस्पृशन्नेव वित्तानि कः परेभ्यः प्रयच्छति ?

३. देवः कुत्र सहायकृत् भवति?

### २. एकपदसमाधानप्रश्ना:

१. मूर्खस्य कति चिह्नानि भवन्ति?

२. केन सर्वे वशाः भवन्ति?

३. अनुष्छानसमये मुनयोऽपि कीदृशाः भवन्ति?

## विशेषतो ज्ञेयाः

### ३. सन्धय:

| | | |
|---|---|---|
| १. तथा + आत्मा | = तथात्मा | - सवर्णदीर्घसन्धिः |
| २. क्षणेन + अधः | = क्षणेनाधः | - सवर्णदीर्घसन्धिः |
| ३. न + आलिङ्गते | = नालिङ्गते | - सवर्णदीर्घसन्धिः |
| ४. न + आर्जिता | = नार्जिता | - सवर्णदीर्घसन्धिः |
| ५. पर + उक्तम् | = परोक्तम् | - गुणसन्धिः |
| ६. न + उपकरणे | = नोपकरणे | - गुणसन्धिः |
| ७. पर + उपदेश | = परोपदेश | - गुणसन्धिः |
| ८. रथस्य + एकम् | = रथस्यैकम् | - वृद्धिसन्धिः |
| ९. मूर्खशतैः +अपि | = मूर्खशतैरपि | - विसर्गसन्धिः |
| १०. तत् +अनुष्ठानसमये | = तदनुष्ठानसमये | - जश्त्वसन्धिः |
| ११. सर्वे + अपि | = सर्वेऽपि | - पूर्वरूपसन्धिः |

| | | |
|---|---|---|
| १२. दुर्जनः अपि | = दुर्जनोऽपि | - विसर्गसन्धिः |
| १३. सर्वः + अपि | = सर्वोऽपि | - विसर्गसन्धिः |
| १४. कः + अपि | = कोऽपि | - विसर्गसन्धिः |
| १५. मुनयः + अपि | = मुनयोऽपि | - विसर्गसन्धिः |
| १६. भूतः + न | = भूतो न | - विसर्गसन्धिः |
| १७. एकः + गुणी | = एको गुणी | - विसर्गसन्धिः |
| १८. तमः + हन्ति | = तमो हन्ति | - विसर्गसन्धिः |

## ४. समासाः

| | | |
|---|---|---|
| १. **परोक्तम्** | - परेण उक्तम् | - तृतीया तत्पुरुषसमासः |
| २. **पिपीलिकार्जितम्** | - पिपीलिकेन आर्जितम् | - तृतीयात्पुरुषसमासः |
| ३. **मक्षिकासञ्चितम्** | - मक्षिकया सञ्चितम् | - तृतीयातत्पुरुषसमासः |
| ४. **क्षमान्वितम्** | - क्षमया अन्वितम् | - चतुर्थीतत्पुरुषसमासः |
| ५. **क्रियासिद्धिः** | - क्रियायाः सिद्धिः | - षष्ठीतत्परुषसमासः |
| ६. **परच्छिद्राणि** | - परेषां छिद्राणि | - षष्ठीतत्पुरुषसमासः |
| ७. **राजेन्द्रः** | - राज्ञाम् इन्द्रः | - षष्ठीतत्पुरुषसमासः |
| ८. **स्वधर्मः** | - स्वस्य धर्मः | - षष्ठीतत्पुरुषसमासः |
| ९. **स्वधर्मरूपः** | - स्वधर्मस्य रूपः | - षष्ठीतत्पुरुषसमासः |
| १०. **जाह्नवीतोयम्** | - जाह्नव्याः तोयम् | - षष्ठीतत्पुरुषसमासः |
| ११. **अप्रियवादी** | - न प्रियवादी | - नञ् तत्पुरुषसमासः |
| १२. **मातापित्रोः** | - माता च पिता च, तयोः | - द्वन्द्वसमासः |

M

# ५ सा मातृभूमिर्मम

महामहोपाध्याय दोर्बल.प्रभाकरशर्मा

## परिचय:

दोर्बल. प्रभाकरशर्मा त्रिलिङ्गाणे मेदकजनपदे रामायम्पेटपट्टणे अनन्तलक्ष्मीरत्न-दीक्षितदम्पत्यो: तृतीय: पुत्र:। इन्दुपुरे भाग्यनगरे च विठ्ठलशास्त्रि,को कं शठकोपरामानुजाचार्य, वरखेट.कृष्णाचार्य, खण्डवल्लि.नरसिंहशास्त्रि, समुद्राल.श्रीनिवासाचार्यप्रभृतीनां सन्निधौ संस्कृतसाहित्यव्याकरणादिषु विशेषेण न्यायशास्त्रे परिश्रमं कृतवान् अग्रजविश्वनाथशर्मण: प्रेरणया। गोदावरीतीरे पश्चिमे गोपुरे आन्ध्रगीर्वाणविद्यापीठे ३८ वर्षाणि आचार्यप्राचार्यपदम् अलंकृतवान्। २०० अधिकं संस्कृताष्टावधानानि २ शतावधाने प्रदर्शितवान्। इदानीं तद्विद्यासंस्थापालनसेवाकार्ये वर्तते। तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन महामहोपाध्याय पदेन सत्कृत:। अस्य नैकगीतानि रचनानि संस्कृतलोके प्रसिद्धानि। श्रीपादश्रीवल्लभकाव्यं पञ्चसहस्रश्लोकात्मकम् अनेन व्यरचि। अनेन बाल्ये एव पठनकाले १९६५ वर्षे सम्भाषणोद्यम आरब्ध: गानं नृत्यं नाटकादिकं प्रयुङ्क्ते, इदानीमपि।

## पाठ्यभागपरिचय:

सर्वेषां मानवानां स्वस्वदेशे, स्वसम्प्रदाये, स्वजातौ, स्वसंस्कारे स्वधर्मे च प्रीतिर्भवेत्। एतत्सर्वं देशभक्तिरित्युच्यते। वयं भारतीयाः प्रकृतिप्रियाः। नदीपर्वतपुण्यप्रदेशवेद-विज्ञानधेनुदेवताः देशभक्तिद्वारैव विश्वे प्रसिद्धाः। आधुनिककाले तां मातृभूमिभक्तिं तत्र श्रद्धां च वर्धयितुं **सा मातृभूमिर्मम** इति पाठ्यांशः अतीव उपकरोतीति मन्यामहे। अध्यापकाः सम्यक् पठित्वा पाठयित्वा छात्रान् मातृदेशभक्तान् कुर्युः तथा भवितुं स्वयं साधनं च कुर्युः।

## पाठ्यभागः

१. क्षान्तिः संस्कारगन्धोऽभिनवमधुरता स्नेह आसक्तिरूपे
योगैक्यं मार्दवं वाग् अभिनवसुविशालत्वयुग् धीर् अरुक् च ।
सन्तृप्तिर् ह्लादकत्वं निरवधि च सुखं सन्ततिश्चाशिषः स्युः
यत्रैते मानवानां प्रकृतिशुभगुणाः मातृभूमिर्हि सा मे ॥

२. छन्दःपादचराः निरुक्तमयसुश्रोत्राः समस्तश्रियः
शिक्षाघ्राणशुभा स्वधर्मशिशवः कल्पाग्रहस्ताः शिवाः।
शुभ्राः व्याकरणाननाः जयकृतः सज्ज्यौतिषेक्षान्विताः
यत्रैताः श्रुतिधेनवः सुगतिदाः सा मातृभूमिर्मम॥

३. भूमिः क्षेमकरी क्षमा शुचि जलं स्नेहात्मकं जीवनम्
तेजः श्रीकरणं पवित्रपवनः संस्कारवाणी वियत्।
बुद्धिः सुस्थिरता मनः सुरचनं सम्यक् क्रियाऽहंकृतिः
यत्रैताः हृदि जागृताः प्रकृतयः सा मातृभूमिर्मम॥

४. देवानां स्तुतयः सरिद्वनभुवां चासत्सतां ता ऋचः
यज्ञानां विधयः क्रियाक्रमफलाङ्गानां यजूंषि श्रियः।
श्रेयोमार्गविधायकानि च नृणां सामान्यथर्वाणि च
ब्रह्मज्ञा अथ यत्र चोपनिषदः सा वेदभूमिर्मम॥

५. वेदाः साङ्गपदक्रमोपनिषदः शास्त्राण्यनेकानि च
प्रज्ञास्थानपुराणकाव्यरचनाः धर्मेतिहासाः कथाः।
अयुर्धर्मरहस्ययोगनटनाः सङ्गीतसूक्तिश्रियो
विद्या यत्र परोपकारविभवाः सा ज्ञानभूमिर्मम॥

६. वङ्गाङ्गान्ध्रकलिङ्गकेरलमहाराष्ट्रोर्ध्वकार्णाटिकाः
पालीप्राकृतसिन्धुगुर्जरतुलुत्रैलिङ्गकाश्मीरिकाः।
भाषाः शास्त्रपुराणभागवतसद्रामायणाद्यर्थदाः
यत्रान्याः श्रुतयश्च संस्कृतिपराः सा भारतीभूर्मम॥

७. ग्रामाणां सरितां पुरां च नगरीपल्लीमहीनां गवां
मन्त्राणामधिदेवताः विविधवस्तूनां क्रियाणां सुराः।
भूदेवाः गृहदेवताः कृषिफलाः कामप्रदा देवताः
यत्राऽघौघहराश्च विघ्नशमनाः सा देवभूमिर्मम॥

८. इन्द्रः श्रीरनलः शुचित्वमनलः प्राणं यमः संयमं
संरक्षां निर्ऋतिः मणींश्च वरुणः श्रीदो धनं शर्म चेट्।
रामो धर्ममुमा सुभाग्यमरुजं सूर्यः समस्तं हरिः
यत्रैवं विबुधाः प्रजासुखधराः सा देवभूमिर्मम॥

९. माता भर्तृसुतेष्टदा स च पिता वृत्तिप्रदो भ्रातरः
स्नेहार्द्राः क्षणदा भगिन्य उचिता गाथा गुरुर्भाषते।
वृद्धाः क्षेमकरोपदेशनपराः सौभ्रात्रयात्राः समे
ग्रामे यत्र गृहे समैक्यपरता सा धर्मभूमिर्मम॥

१०. अस्वार्था हितवृत्तयः सुशिवसङ्कल्पाः प्रसेवाप्रियाः
अव्यापारपरायणाः क्षणमपि व्यर्थक्रिया नैव ये।
स्वक्षेत्रे परिधौ क्रियाः विदधते ते क्षेमसद्भावनाः
यत्रास्मत् स्वजनाः उदारचरिताः सा कर्मभूमिर्मम॥

११. प्राणायामपवित्रकार्यनियमप्रत्याहृतिस्वासन-
ध्यानाभ्यासयमात्मधारणमयोऽष्टाङ्गः शमस्थापकः।
योगश्चित्तनिरोध ईशकरुणास्मृत्यादिना लभ्यते
यत्रानन्तशरीररोगहरणः सा योगभूमिर्मम॥

१२. लोकस्यैव हिताय संस्कृतिदृढत्वायैकतासिद्धये
सौकर्याय परस्परोपकरणव्यापारजीवातवे।
विज्ञानाय विवेचनाय सततश्रेयोविधानर्षयो
यत्र ज्ञानधराः जयन्ति मुनयः सा क्ष्मा तपोभूर्मम॥

१३. गङ्गा पापहरा रुजाहयमुना गोदावरी पावनी
कृष्णा दोषहरा मलापहसरस्वत्यैन्द्री प्रणीता नदी।
कावेरी विकृतिक्षरी च सरयू रेवा ह्यसी नर्मदा
एवं यत्र नदाः सरन्ति सरितः सा सिन्धुभूमिर्मम॥

१४. संस्काराः चिरसम्प्रदायरुचिराः पाका नवा भावनाः
आयुर्जीवनसाधनान्यकलुषाण्यव्याजसत्यानि च।
सर्वप्राण्युपकारकारि सुमहद् विज्ञानमार्षामृतं
मीमांस्यं खलु यत्र सा विजयते विज्ञानभूमिर्मम॥

१५. आचारः सदनुष्ठितिः जपतपोयोगाः सपर्या स्मृतिः
ध्यानं होम उपासनं कृषिरुदास्तिः शुभास्था धृतिः।
यागो जागरिका समर्चनम् उपादानं प्रदानार्पणे
यत्रैवंविधलोकदेवयजनं सा यज्ञभूमिर्मम॥

१६. हेमाद्री रजताद्रिरिन्द्रनग आरावली उदग्दक्षिण-
प्रागस्ता गिरयो महेन्द्रमलयौ सह्यो हिमो रैवतः।
विन्ध्यो मन्दरमाल्यवच्छ्रुतिधराः गोवर्धनः श्रीगिरिः
यत्रैवंविधनैकदेवगिरयः सा पुण्यभूमिर्मम॥

१७. श्रीः काशी मधुरा पुरी च विजया काञ्ची ह्यवन्ती व्रजो
वैशाली च गया प्रयाग उडुपी देहल्ययोध्यापुरी।
इन्द्रप्रस्थम् अहोबिलं तिरुपतिः श्रीरङ्गधामामृतं
यत्रैवंविधनैकतीर्थनिवहः सा पुण्यभूमिर्मम॥

१८. व्यासब्रह्मजनाकुजातकपिलागस्त्याङ्गिरोविश्वपा-
विश्वामित्रवसिष्ठगौतमभरद्वाजात्रिभृग्वादयः।
श्रीमच्छङ्करकालिदासभवभूतिश्रीधराः सज्जनाः
यत्राचार्यकवीश्वराः समहिताः साऽऽर्षभूमिर्मम॥

## अभ्यासः

### १. निबन्धप्रश्नौ

१. मातृभूमेः वैभवं कविः कथं प्रशशंस?

२. सा मातृभूमिर्मम इति पाठ्यभागसारांशं लिखत।

### २. सन्दर्भवाक्यानि

१. यत्रैताः हृदि जागृताः प्रकृतयः सा मातृभूमिर्मम।

२. विद्या यत्र परोपकारविभवाः सा ज्ञानभूमिर्मम।

३. ग्रामे यत्र गृहे समैक्यपरता सा धर्मभूमिर्मम।

### ३. लघुसमाधानप्रश्नाः

१. मानवानां प्रकृतिशुभगुणाः के?

२. देवगिरीणां पञ्च नामानि लिखत?

३. सर्वप्राणिनामुपकारकारि किम्?

### ४. एकपदसमाधानप्रश्नाः

१. सा मातृभूमिर्मम इति पाठ्यभागः केन विरचितः ?

२. पापहरा नदी का ?

३. चिरसम्प्रदायरुचिराः के ?

## व्याकरणांशाः

### ५. सन्धयः

| | | |
|---|---|---|
| १. योग + ऐक्यम् | = योगैक्यम् | - वृद्धिसन्धिः |
| २. यत्र + एते | = यत्रैते | - वृद्धिसन्धिः |
| ३. व्याकरण + आननाः | = व्याकरणाननाः | - सवर्णदीर्घसन्धिः |
| ४. देवभूमिः+ मम | = देवभूमिर्मम | - विसर्गसन्धिः |
| ५. साङ्गपदक्रम+ उपनिषदः | = साङ्गपदक्रमोपनिषदः | - गुणसन्धिः |
| ६. शास्त्राणि+ अनेकानि | = शास्त्राण्यनेकानि | - यणादेशसन्धिः |
| ७. धर्म+ इतिहासाः | = धर्मेतिहासाः | - गुणसन्धिः |
| ८. यत्र+ अन्याः | = यत्रान्याः | - सवर्णदीर्घसन्धिः |
| ९. स्नेह+ आर्द्राः | = स्नेहार्द्राः | - सवर्णदीर्घसन्धिः |
| १०. सरस्वती+ ऐन्द्री | = सरवस्वत्यैन्द्री | - यणादेशसन्धिः |
| ११. देहली+ अयोध्यापुरी | = देहल्ययोध्यापुरी | - यणादेशसन्धिः |
| १२. सप्त+ ऋषिः | = सप्तर्षिः | - गुणसन्धिः |

### ६. समासाः

| | | |
|---|---|---|
| १. **संस्कारगन्धः** | - संस्कार एव गन्धः | - अव.पूर्व.कर्मधारयसमासः |
| २. **मातृभूमिः** | - मातुः भूमिः | - षष्ठीतत्पुरुषसमासः |
| ३. **पवित्रपवनः** | - पवित्रश्चासौ पवनश्च | - वि.पूर्व.कर्मधारयसमासः |

| | | |
|---|---|---|
| ४. **संस्कारवाणी** | - संस्काराय वाणी | - चतुर्थीतत्पुरुषसमासः |
| ५. **गृहदेवताः** | - गृहस्य देवताः | - षष्ठीतत्पुरुषसमासः |
| ६. **प्रकृतिशुभगुणाः** | - शुभाश्च ते गुणाश्च | - वि.पूर्व.कर्मधारयः |
| | प्रकृत्या शुभगुणाः | - तृतीयातत्पुरुषः |
| ७. **अघौघहराः** | - हरन्तीति हराः - | |
| | - अघानामोघः | - षष्ठीतत्पुरुषसमासः |
| | - अघौघस्य हराः | - षष्ठीतत्पुरुषसमासः |
| ८. **सर्वप्राण्युपकारकारि** | - सर्वे च ते प्राणिनश्च - सर्वप्राणिनः- | वि.पूर्व.कर्मधारयः |
| | उपकारं करोतीति उपकारकारि - | कृद्वृत्तिः |
| | सर्वप्राणिनाम् उपकारकारि | - षष्ठीतत्पुरुषसमासः |

## विशेषतो ज्ञेयाः

### ७. कठिनशब्दार्थाः

| | |
|---|---|
| धीः | - बुद्धिः |
| अरुक् | - रोगरहितः |
| क्षान्तिः | - सहनम् |
| मार्दवम् | -मृदुत्वम् |
| निरवधि | - अनन्तम् |
| वियत् | - आकाशः |
| नृणाम् | - नराणाम् |
| श्रुतयः | - वेदाः |
| सरिताम् | - नदीनाम् |

| | |
|---|---|
| सुराः | - देवाः |
| अघौघः | - पापसमूहः |
| अनलः | - अग्निः |
| विबुधाः | - पण्डिताः |
| हेमाद्रिः | - मेरुपर्वतः |
| रजताद्रिः | - कैलासपर्वतः |

I

# ६ चित्रविंशतिः

श्रीजटावल्लभुल.पुरुषोत्तमशास्त्री

## परिचयः

**चित्रविंशतिः** इत्ययं पाठ्यभागः श्रीजटावल्लभुल. पुरुषोत्तमकविना विरचिते चित्रशतकम् इत्याख्ये ग्रन्थे गीर्वाणवाणी-चित्रलोकः इति विषयद्वयात् संगृहीतः। श्रीजलावल्लभुलपुरुषोत्तमकवयः आन्ध्रेषु सुप्रसिद्धाः। आन्ध्रगीर्वाणवाण्योः न केवलं एम्.ए उपाधिभाजः अपि तु विद्वांसोऽपि। एते सुचिरं कोव्वूरुपुरस्थान्ध्रगीर्वाणकलाशालायाः अध्यक्षपदवीम् अतिनिपुणमधिष्ठाय विजयवाटिकानगरीस्थ एस्.आर्.आर्.सि.वि.आर् कलाशालायां संस्कृतोपन्यासकपदमलङ्कृतवन्तः। अपि च एते महाशयाः आन्ध्रभाषायां श्लाघ्यतमाः वक्तारः इति अतुलां कीर्तिमपि अलभन्त।

## पाठ्यभागपरिचय:

पाठेऽस्मिन् गीर्वाणवाण्याः माहात्म्यम्, आधुनिके काले कथं मानवानां बुद्धिः श्रुतिविरुद्धा, शास्त्रविरुद्धा च वर्तते इति इमानंशान् सयुक्तिकं समुपादयत्।

## सारांशः

गीर्वाणवाणी अमृतस्रवन्ती सूक्तिसुरत्नवारिधिश्च। मुमुक्षुभिः स्वर्गकामुकैः रसपिपासुभिः एषा वाणी समं सेवितव्या। यथा सर्वासु सुतासु मातुः गुणाः वर्तन्ते तथैव सर्वासु भाषासु संस्कृतभाषापदानि दरीदृश्यन्ते। साम्प्रतमपि असंख्याकैः जनैः संस्कृतं भाष्यते। प्रतिवत्सरं लक्षशः प्रबन्धाः विक्रीयन्ते। अतः भाषा मृता इति वादः सत्यदूर एव। मानवाः स्वार्थबुद्ध्या यथाशक्ति पापकर्माणि कृत्वा नरके पतन्ति। नराः सुखमिच्छन्ति परं तत् पुण्येनैव प्राप्यमिति विज्ञायापि पापं कुर्वन्ति। अतः परं लोके चित्रं किमस्ति।

पितरि ईश्वरे भक्तिं प्रदर्शयन्ति। परन्तु वेदे अनादराः। एतेषां पितृभक्तिः अतीव चित्रा। यदि मह्यं रोचते वेदः अङ्गीक्रियते, किन्तु वेदोक्तः विषयः यदि न ज्ञायेत तर्हि श्रुतिः अप्रमाणमिति वदामीत्ययं विषयोऽपि अति विचित्रः।

## पाठ्यभागः

# गीर्वाणवाणी

१. सुधास्रवन्ती सुरभाषिता या
सूच्चारणा सूक्तिसुरत्नवार्धिः।
सुकाव्यसन्दोहनिधिश्च वाणी
सा संस्कृताख्या सुकृतैकलभ्या॥

२. निश्रेणिका मोक्षपदस्य सा वाक्
स्वर्गस्य सोपानततिश्च रूढा।
शृङ्गारवीरादिरसालवालं
सेव्या समं भिन्नरुचेर्जनस्य॥

३. सुतासु सर्वासु यथैव मातु-
र्गुणा भवन्त्येवममर्त्यवाण्याः।
सर्वासु भाषासु च सन्ति लोके
ततश्च तस्याः खलु मातृतोक्ता॥

४. गीर्वाणवाण्यामुदयः पदानां
स्वधातुहेतोरिति जन्मशुद्धिः।
अन्यासु लोके बहुशः पदानां
निष्पत्तिरन्याभ्य इवाभिदृश्या॥

५. माता हि भाषा विततेश्च लोके
मातेव रक्षत्यपि चाऽऽश्रितान् हि।
सा मातृभाषा भुवि संस्कृताख्या
वाच्याः कथं मातृपदेन चाऽऽन्याः।।

६. अत्यद्भुतां शक्तिमवेहि वाण्या
यस्यां प्रवीणा अधुनाऽपि लोके।
पुरातनश्लोकचयं पठित्वा
तन्वन्ति लज्जालुमसंस्कृतज्ञम्।।

७. या भाष्यते लक्षजनैरसंख्यैः
या ज्ञायते यल्लिखितप्रबन्धाः।
क्रीताश्च लक्षैः प्रतिवर्षमद्य
भाषा मृता सेति मृषैव वादः।।

८. विवाहकाले पितृदेवकार्ये
कवित्ववेदान्तविचारगोष्ठ्याम्।
देहे सदा प्राण इवाऽस्ति या वाक्
त्यक्त्वा कथं तां वयमावसाम।।

९. भूतं समस्तं मृततुल्यमाहुः
पूतं सतीनां च महामुनीनाम्।
भूतं चरित्रं पुरतस्सजीवम्
अस्माकमाधाय कथं मृता सा।।

१०. रम्यं कवित्वं भुवि धर्मदूरं
धर्म्यं कवित्वं न हि रम्यमेव।
स्वर्णं सुगन्धिद्विगुणं कवित्वं
गीर्वाणवाण्या इतरत्र कुत्र।।

# चित्रलोकः

११. स्वार्थोऽस्तु मे त्वन्यहितं न गण्यं
ब्रुवन्तमेवं बहु पापजालम्।
कृत्वा ततोऽमुत्र च दुःखभाजः
स्वार्थोऽहि तेषामति चित्ररूपः।।

१२. सद्यस्सुखं स्वल्पमघेन लभ्यं
महत्सुखं भावि च पुण्यकार्यैः।
जनस्सुखार्थी च करोति पापं
ततोऽपि चित्रं किमिहास्ति लोके।।

१३. सर्पेण दष्टो मरणोन्मुखोऽपि
मन्त्रस्य शक्त्या पुनरुत्थितस्सन्।
कश्चित्पुनर्निन्दति मन्त्रशक्तिं
ततोऽपि चित्रं किमिहास्ति लोके।।

१४. ब्रुवन्ति केचिद्वयमीशभक्ताः
तथापि वेदे न हि भक्तिमन्तः।
भक्तिः पितर्यस्ति न तस्य वाक्ये-
ष्वेवं मतिश्चित्रमतीव लोके।।

१५. चित्रो हि वादोऽस्ति मदीयकन्या
महानसे नैव निरोधनीया।
पूज्याः स्त्रियः तर्हि कथं नु भुक्तिः
भृत्या हि पत्नी वद किं न सा स्त्री।।

१६. स्वदेशवातावरणप्रतीपं
वृथोल्बणं वस्त्रचयं दधानः।
पराऽनुकारी मुनिमार्गरक्तं
निन्दत्यहो अन्ध इतीह चित्रम्।।

१७. नवीनविद्यासु दिने दिने हि
दोषाः प्रदृष्टा बहवस्तथापि।
निर्दोष वेदो यदि तद्विरुद्धो
न ग्राह्य एवेति विचित्रवादः।।

१८. वेदोक्तधर्मो यदि रोचते मे
गृह्णामि तं तर्हि न चेन्न चेति।
कश्चिद्वदत्वद्य विचित्रमस्य
स्वबुद्ध्यतीता श्रुतिरप्रमाणम्।।

१९. गेहं मदीयं हि तदेव नाऽह-
मित्थं विजानाति नरस्सुखेन।
देहोऽसवोहद्धिषणा ममेति
ज्ञात्वापि तादात्म्यमपैति चित्रम्।।

२०. वाल्मीकितुल्यः कविरद्य नास्ति
ग्रन्थोऽपि गीतासदृशो न जातः।
ऋष्यादयो नाऽद्य तथाऽपि चित्रं
मनुष्यबुद्धिक्रमवृद्धिवादः।।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. गीर्वाणवाण्याः वैभवं लिखत।

२. पाठ्यभागमनुसृत्य गीर्वाणवाण्याः साराशं लिखत।

### २. लघुसमाधानप्रश्नाः

१. संस्कृताख्या वाणी कीदृशी?

२. अमर्त्यवाण्याः मातृता कथमागता?

३. लोके चित्रमतिः कः?

### ३. एकपदसमाधानप्रश्नाः

१. सर्वासु सुतासु कस्याः गुणाः भवन्ति?

२. देहे सदा प्राण इव का अस्ति?

३. चित्रविंशतिः इति पाठ्यभागः कस्मात् स्वीकृतः?

### ४. सन्दर्भवाक्यानि

१. सा संस्कृताख्या सुकृतैकलभ्या।

२. वाच्याः कथं मातृपदेन चान्याः।

३. भृत्या हि पक्त्री वद किं न सा स्त्री।

## विशेषतो ज्ञेयाः

### ५. कठिनशब्दार्थाः

| | |
|---|---|
| आधाय | - निधाय |
| पक्त्री | - पाचिका |
| असवः | - प्राणाः |
| धिषणा | - बुद्धिः |

सोपानततिः - सोपानसमुदायः
वेदः - श्रुतिः
गीर्वाणवाणी - संस्कृतभाषा
मृषा - असत्यम्
सुता - पुत्री
त्यक्त्वा - विसृज्य
पूतम् - पवित्रम्
सुखार्थी - सुखेच्छुः
महानसः - पाकशाला
भृत्या - सेविकया
वस्त्रचयम् - वस्त्रसमूहम्
अप्रमाणम् - प्रमाणभिन्नम्

### ६. सन्धयः

| | | |
|---|---|---|
| १. सु+ उच्चारणा | = सूच्चारणा | - सवर्णदीर्घसन्धिः |
| २. सुकृता+ एकलभ्या | = सुकृतैकलभ्या | - वृद्धिसन्धिः |
| ३. मातृता+ उक्ता | = मातृतोक्ता | - गुणसन्धिः |
| ४. संस्कृता+ आख्या | = संस्कृताख्या | - सवर्णदीर्घसन्धिः |
| ५. अति+ अद्भुताम् | = अत्यद्भुताम् | - यणादेशसन्धिः |
| ६. सद्यः+ सुखम् | = सद्यस्सुखम् | - विसर्गसन्धिः |
| ७. ततः+ अपि | = ततोऽपि | - विसर्गसन्धिः |
| ८. पितरि+ अस्ति | = पितर्यस्ति | - यणादेशसन्धिः |
| ९. तत्+ विरुद्धः | = तद्विरुद्धः | - जश्त्वसन्धिः |
| १०. सा+ इति | = सेति | - गुणसन्धिः |

### ७. समासाः

१. **सुरभाषिता** - सुरैः भाषिता - तृतीयातत्पुरुषसमासः

२. **वाल्मीकितुल्यः** - वाल्मीकिना तुल्यः - तृतीयातत्पुरुषसमासः

३. **गीतासदृशः** - गीतया सदृशः - तृतीयातत्पुरुषसमासः

४. **जन्मशुद्धिः** - जन्मना शुद्धिः - तृतीयातत्पुरुषसमासः

५. **सूच्चारणा** - शोभनमुच्चारणं यस्यास्सा - बहुव्रीहिसमासः

६. **पुरातनश्लोकचयम्** - पुरातनाश्च ते श्लोकाश्च पुरातनश्लोकाः-वि.पूर्व.कर्मधारयः

पुरातनश्लोकानां चयः, तम् - षष्ठीतत्पुरुषसमासः

## गद्यभागः


| | |
|---|---|
| १. मन्दविषसर्पकथा | - नारायणपण्डितः |
| २. विक्रमस्य औदार्यम् | - शिवदासः |
| ३. राजवाहनजननम् | - महाकविदण्डिः |
| ४. अपर्याप्तः समयः | - आचार्य राणि.सदाशिवमूर्तिः |
| ५. भिषजः भैषज्यम् | - म.म. पुल्लेल.श्रीरामचन्द्रः |
| ६. अप्पय्यदीक्षितेन्द्रः | - डा. उषाराणि सङ्का |

# गद्यभागः

# १ मन्दविषसर्पकथा

नारायणपण्डितः

## परिचयः

संस्कृतसाहित्ये नीतिबोधककथासाहित्यस्य महत्स्थानमस्ति। एतत् साहित्यं पाठकानां विद्यार्थिनां च जीवने उन्नतिं साधयितुं महता उपकरिष्यति। पूर्वसूरिभिः मानवजीवनोन्नतिं लक्षीकृत्य नैकानि नीतिकथाकाव्यानि संरचितानि। तेषु विष्णुशर्मणा रचितं पञ्चतन्त्रमिति नीतिकथाकाव्यं प्रमुखं स्थानमावहति। तमनुसृत्य अनन्तरकाले इतराण्यपि कानिचन नीतिकथाकाव्यानि विरचितानि वर्तन्ते। तादृशेषु हितोपदेशः अन्यतमः। अस्मिन् चत्वारो भागास्सन्ति। ते च-

**१.मित्रलाभः** **२.मित्रभेदः** **३.विग्रहः** **४.सन्धिः** इति।

एतेषु चतुर्षु भागेषु बालानां नीतिः उपदिश्यते। अस्य रचयिता नारायणपण्डितः। पूर्वोक्तेषु भागेषु सन्धिभागात् स्वीकृता **मन्दविषसर्पकथा** एव प्रकृतपाठ्यभागः।

## पाठ्यभागः

**स्कन्धेनापि वहेत् शत्रून् कार्यमासाद्य बुद्धिमान्।**
**यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः।।**

अस्ति जीर्णोद्याने मन्दविषो नाम सर्पः। सोऽतिजीर्णतया स्वाहारमपि अन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः।

ततो दूरादेव केनचिन्मण्डूकेन दृष्टः पृष्टश्च- किमिति भवान् आहारं नान्विष्यति?

सर्पोऽवदत्- गच्छ भद्र! किं ते मम मन्दभाग्यस्य वृत्तान्तप्रश्नेन?

ततः सञ्जातकौतुकः स भेकः- सर्वथा कथ्यताम् इत्याह।

सर्पोऽप्याह - भद्र! ब्रह्मपुरवासिनः श्रोत्रियस्य कौण्डिन्यस्य पुत्रः विंशतिवर्षदेशीयः सर्वगुणसम्पन्नो दुर्दैवात् मया नृशंसेन दष्टः। ततस्तं सुशीलनामानं पुत्रं मृतमवलोक्य शोकेन मूर्छितः कौण्डिन्यः पृथिव्यां लुलोठ। अनन्तरं ब्रह्मपुरवासिनः सर्वे बान्धवाः तत्रागत्य उपविष्टाः।

तथा चोक्तम्-

**उत्सवे व्यसने युद्धे दुर्भिक्षे राष्ट्रविप्लवे।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः।।**

तत्र कपिलो नाम स्नातकोऽवदत्- 'अरे कौण्डिन्य! मूढोऽसि, येनैवं विलपसि। शृणु-

**जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।**
**अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः।।**

अपरञ्च-

**आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने।**
**आघातं नीयमानस्य वध्यस्येव पदे पदे।।**

यतः-

**अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः।**
**ऐश्वर्यं प्रियसंवासो मुह्येत्तत्र न पण्डितः।।**

**यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति।**
**विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः।।**

अन्यच्च-

**पञ्चभिर्निर्मिते देहे पञ्चत्वं च पुनर्गते।**
**स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना।**

**नायमत्यन्तसंवासो लभ्यते येन केनचित्।**
**अपि स्वेन शरीरेण किमुतान्येन केनचित्।।**

अपि च-

**संयोगो हि वियोगस्य संसूचयति सम्भवम्।**
**अनतिक्रमणीयस्य जन्ममृत्योरिवागमम्।।**

अथ संसारं विचारय, शोकोऽयम् अज्ञानस्य प्रपञ्चः।

पश्य-

**अज्ञानं कारणं न स्याद् वियोगो यदि कारणम्।**
**शोको दिनेषु गच्छत्सु वर्धतामपयाति किम्।।**

तद्भद्र! तदात्मानमनुसन्धेहि, शोकचर्चां च परिहर।

यतः-

**अकाण्डपातजातानां गात्राणां मर्मभेदिनाम्।**
**गाढशोकप्रहाराणामचिन्तैव महौषधम्।।**

ततः तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्यः उत्थाय अब्रवीत्- तदलमिदानीं गृहनरकवासेन, वनमेव गच्छामि।

कपिलः पुनराह-

**वनेऽपि दोषाः प्रभवन्ति रागिणां**
**गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः।**
**अकुत्सिते कर्मणि यः प्रवर्तते**
**निवृत्तरागस्य गृहं तपोवनम्।।**

विशेषतश्च-

**जन्ममृत्युजराव्याधिवेदनाभिरुपद्रुतम्।**
**संसारमिममत्यन्तमसारं त्यजतः सुखम्।।**

यतः-

**दुःखमेवास्ति न सुखं यस्मात्तदुपलक्ष्यते।**
**दुःखार्तस्य प्रतीकारे सुखसंज्ञा विधीयते।।**

कौण्डिन्यो ब्रूते- एवमेव ततोहं तेन शोकाकुलेन ब्राह्मणेन शप्तो यद्- अद्यारभ्य मण्डूकानां वाहनं भविष्यसि इति।

कपिलो ब्रूते- सम्प्रति उपदेशासहिष्णुः भवान्। शोकाविष्टं ते हृदयम्। तथापि कार्यं शृणु-

**सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते।**
**स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम्।।**

एतत् श्रुत्वा स कौण्डिन्यः कपिलोपदेशामृतप्रशान्तशोकानलो यथाविधि दण्डग्रहणमकरोत्। अतो ब्राह्मणशापात् मण्डूकान् वोढुम् अत्र तिष्ठामि इति।

अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादनाम्नः अग्रे तत्कथितम्। ततोऽसौ अत्रागत्य मण्डूकनाथः तस्य सर्पस्य पृष्ठमारूढवान्। स च सर्पः तं पृष्ठे कृत्वा चित्रपदक्रमं बभ्राम।

परेद्युः चलितुमसमर्थं तं मण्डूकनाथः अवदत्- किमद्य भवान् मन्दगतिः?

सर्पो ब्रूते- देव! आहारविरहात् असमर्थोऽस्मि।

मण्डूकनाथः अवदत्- अस्मदाज्ञया मण्डूकान् भक्षय।

ततः स सर्पः- गृहीतोऽयं महाप्रसादः इत्युक्त्वा क्रमशः सर्वान् मण्डूकान् खादितवान्। अथ निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः।

अतोहं ब्रवीमि- **स्कन्धेनापि वहेत् शत्रून् कार्यमासाद्य बुद्धिमान्** इत्यादि।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. मन्दविषसर्पकथां सङ्ग्रहेण लिखत।

२. 'मन्दविषसर्पकथा' इति पाठ्यभागस्य सारांशं लिखत।

### २. लघुसमाधानप्रश्नाः

१. मन्दविषो नाम सर्पः कुत्र वसति?

२. कौण्डिन्येन मन्दविषः किम् इति शप्तः?

३. हितोपदेशे कति भागाः सन्ति? ते च के ?

### ३. एकपदसमाधानप्रश्नाः

१. कौण्डिन्यस्य पुत्रः कः?

२. मण्डूकनाथः कः?

३. हितोपदेशः केन विरचितः?

## ४. सन्दर्भवाक्यानि

१. मृत्युर्वै प्राणिनां ध्रुवः।

२. निवृत्तरागस्य गृहं तपोवनम्।

३. सतां सङ्गो हि भेषजम्।

### व्याकरणांशाः

## ५. सन्धयः

| | | |
|---|---|---|
| १. तत्र + आगत्य | = तत्रागत्य | - सवर्णदीर्घसन्धिः |
| २. स्व + आहारम् | = स्वाहारम् | - सवर्णदीर्घसन्धिः |
| ३. दुःखमेव + अस्ति | = दुःखमेवास्ति | - सवर्णदीर्घसन्धिः |
| ४. च + उक्तम् | = चोक्तम् | - गुणसन्धिः |
| ५. येन + एवम् | = येनैवम् | - वृद्धिसन्धिः |
| ६. इति + आह | = इत्याह | - यणादेशसन्धिः |
| ७. तत् + वचनम् | = तद्वचनम् | - जश्त्वसन्धिः |
| ८. तत् + अलम् | = तदलम् | - जश्त्वसन्धिः |
| ९. यः + तिष्ठति | = यो तिष्ठति | - विसर्गसन्धिः |
| १०. संयोगः + हि | = संयोगो हि | - विसर्गसन्धिः |
| ११. मन्दविषः + नाम | = मन्दविषो नाम | - विसर्गसन्धिः |
| १२. सर्पः + अवदत् | = सर्पोऽवदत् | - विसर्गसन्धिः |
| १३. असमर्थः + अस्मि | = असमर्थोऽस्मि | - विसर्गसन्धिः |

| | | |
|---|---|---|
| १४. शोकः + अयम् | = शोकोऽयम् | - विसर्गसन्धिः |
| १५. ततः + तम् | = ततस्तम् | - विसर्गसन्धिः |
| १६. पुनः + गच्छेत् | = पुनर्गच्छेत् | - विसर्गसन्धिः |

### ६. समासाः

| | | |
|---|---|---|
| १. **दुःखार्तस्य** | - दुःखेन आर्तः, तस्य | - तृतीयातत्पुरुषसमासः |
| २. **मण्डूकनाथः** | - मण्डूकानां नाथः | - षष्ठीतत्पुरुषसमासः |
| ३. **द्रव्यसञ्चयः** | - द्रव्यस्य सञ्चयः | - षष्ठीतत्पुरुषसमासः |
| ४. **अनित्यम्** | - न नित्यम् | - नञ् तत्पुरुषसमासः |
| ५. **अज्ञानम्** | - न ज्ञानम् | - नञ् तत्पुरुषसमासः |
| ६. **असारम्** | - न सारम् | - नञ् तत्पुरुषसमासः |
| ७. **अकुत्सितः** | - न कुत्सितः | - नञ् तत्पुरुषसमासः |
| ८. **अनतिक्रमणीयः** | - न अतिक्रमणीयः | - नञ् तत्पुरुषसमासः |
| ९. **मन्दभाग्यः** | - मन्दं भाग्यं यस्य सः | - बहुव्रीहिसमासः |

# २ विक्रमस्य औदार्यम्

शिवदासः

## परिचयः

प्रस्तुतपाठ्यभागोऽयं द्वादशशताब्द्यां निवसता शिवदासेन रचितात् विक्रमार्कचरितात् स्वीकृतः। विक्रमार्कमधिकृत्य अनेके वृत्तान्ताः सन्ति। केचन बृहत्कथामञ्जर्याम्, केचन कथासरित्सागरे, अपरे केचन वेतालपञ्चविंशत्याम् अन्ये केचन सिंहासनद्वात्रिंशिकायां च वर्तन्ते। विक्रमार्कचरिते सालभञ्जिकया उक्तं चतुर्थोपाख्यानं पाठ्यभागरूपेण स्वीकृतम्।

### पाठ्यभागपरिचयः

पाठ्यभागेऽस्मिन् पुत्रार्थं विप्रेण कृतं परमेश्वराराधनम्, सन्तुष्टेन परमेश्वरेण तस्मै पुत्रप्रसादनम्, काननं प्रति ब्राह्मणपुत्रगमनम्, ब्राह्मणपुत्रेण काननात् नगरं प्रति राजानयनम्, ब्राह्मणपुत्रेण राजपुत्रापहरणं ततः ब्राह्मणपुत्रमधिकृत्य विक्रमस्य औदार्यप्रकटनं चेत्येते विषया उपवर्णिताः।

## पाठ्यभागः

भूयोऽप्येकदा सिंहासनमारोढुमागच्छति भोजे सालभञ्जिका अब्रवीत्- ''यदि त्वम् औदार्येण विक्रमार्कम् अनुसरेः तर्हि इदं सिंहासनम् आरोह''। राजा- ''ब्रूहि मे तस्य औदार्यवृत्तान्तम्''। सालभञ्जिका ततः कथां कथयितुमारेभे।

विक्रमादित्ये राज्यं कुर्वत्युज्जयिन्यां ब्राह्मणः कोऽपि सकलविद्याविचक्षणः सकलगुणालङ्कृतश्च परम् अपुत्रः समभवत्। तं चैकदा तत्प्रेयसी जगाद- ''भोः प्राणनाथ! पुत्रं विना गृहस्थस्य गतिर्नास्ति इति स्मृतिपुराणविदः समामनन्ति।

तथाच-

**अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च।**
**तस्मात्पुत्रमुखं दृष्ट्वा भवेत्पश्चाद्धि तापसः।।**

**वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः।**
**सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना''।।** इति।

तच्छ्रुत्वा भूसुरः प्राह- ''प्रिये! सत्यमवादीः परमुद्यमेन विना द्रव्यम्, गुरुशुश्रूषां विना विद्या परमेश्वरप्रसादं विना सन्ततिश्च न लभ्यते।''

तदाकर्ण्य ब्राह्मणी पुनर्जगाद- ''भोः स्वामिन्! जानासि किल सर्वम्, कुतः परमेश्वर-प्रसादनं किमपि नानुतिष्ठसि?''

ब्राह्मणः- ''भोः प्रिये! युक्तमाह भवती।

**युक्तियुक्तमुपादेयं वचनं बालकादपि।**
**विदुषा तु सदा ग्राह्यं वृद्धादपि न दुर्वचः''।।**

इत्युक्त्वा स विप्रः परमेश्वरप्रसादनाय रुद्रानुवाकैरयजत। अथैकदा रात्रौ ब्राह्मणं स्वप्ने जटामकुटधारी वृषभवाहनः शैलतनयासमाश्लिष्टवामतनुः चन्द्रकलावतंसः परमेश्वरः चक्षुषोः पदमवतीर्य एवमवदत्-

''पुत्र! प्रदोषव्रतमाचर। तेन तव पुत्रो भविष्यति'' इति। ब्राह्मणस्तु प्रबुद्ध्य ससंभ्रम-मुत्थाय स्वप्नवृत्तान्तं वृद्धेभ्यो निवेदयामास। तेऽब्रुवन् ''तात! यथार्थोऽयं स्वप्नः। उक्तं च स्वप्नाध्याये-

**देवो द्विजो गुरुर्वापि पितरो लिङ्गिनस्तथा।**
**यद्वदन्ति वचः स्वप्ने तत्तथैव विनिर्दिशेत्।।**

अस्मिन् व्रतेऽनुष्ठिते सर्वथा तव पुत्रो भविष्यति'' इति।

तस्य वचनं मनसि कृत्वा ब्राह्मणो मार्गशीर्षशुद्धत्रयोदश्यां मन्दवासरे कल्पोक्तप्रकारेण प्रदोषव्रतमन्वतिष्ठत्। अथानुष्ठिते च व्रते परमेश्वरः प्रसन्नो भूत्वा पुत्रमस्मै प्रायच्छत्। तदनन्तरं ब्राह्मणस्तस्य जातकर्म विधाय द्वादशे दिवसे देवदत्त इति नाम च कृत्वा अवशिष्टानि अन्नप्राशनचौलोपनयनादीनि कर्माणि यथाकालमकार्षीत्। वेदान् साङ्गान् अध्यापयामास। ततो षोडशे वर्षे गोदानादिकं विधाय सुरूपां बुद्धिशीललक्षणसम्पन्नां कामपि कन्यकामन्विष्य तस्य विवाहं कृत्वा जीवनं परिकल्प्य स्वयं तीर्थयात्रां कर्तुकामः पुत्राय बुद्धिमेवम् उपदिदेश- ''पुत्र! श्रूयतामुपदेशोऽयम्। इह परत्र च सुखकारी मया कथ्यते''।

देवदत्तः- ''आर्य! धन्योऽस्मि। यथेच्छम् उपदिशतु भवान्''।

पिता- ''वत्स! अतिकष्टां दशां प्राप्तोऽपि स्वधर्माचारं मा परित्यज। परैस्सह विवादं माकार्षीः। सर्वभूतेषु दयां कुरु। परमेश्वरे भक्तिं विधेहि। परस्त्रियो मा विलोकय। बलवद्विरोधं मा कुरु। मर्मज्ञेषु अनुवृत्तिं विधेहि। प्रस्तावसदृशं वद। स्ववित्तानुसारेण व्ययं कुरु। सज्जनान् आश्रय। दुर्जनान् परिहर। स्त्रीभ्यो गुह्यं मा वद''। एवमन्याश्च नीतीरुपदिश्य स्वयं वाराणसीं जगाम। देवदत्तश्च पितुरुपदेशं पालयन् तत्रैव नगरे सुखमुवास।

अथैकदा होमाय समिधः समाहर्तुं सः महदरण्यं प्रविश्य यावत् समिधः चिच्छेद तावत् विक्रमो राजा मृगयार्थं विपिनमवगाह्य महान्तमेकं सूकरम् अनुधावन् तत्रागत्य देवदत्तं दृष्ट्वा पुरमार्गं जानन्नपि पप्रच्छ। तेन पृष्टो देवदत्तः स्वयमग्रे गच्छन् राजानं नगरम् अनीनयत्। तदनन्तरं राजा देवदत्तं बहुधा सम्मान्य कुत्रापि राजकार्ये न्ययुङ्क्त। एवं महान् कालः समतिचक्राम।

अथैकदा राजा मध्येसभमवादीत्-''कथमहं देवदत्तकृतादुपकारात् उत्तीर्णो भविष्यामि? यदयं मां महतोऽरण्यात् नगरम् अनैषीत्''। तदा कोऽपि जगाद- ''हन्त! अयं महापुरुषः। यत्कृतमुपकारं चिरादपि न विस्मरति।

तथा चोक्तम्-

**प्रथमवयसि पीतं तोयमल्पं स्मरन्तः**
**शिरसि निहितभारा नारिकेळा नराणाम्।**
**सलिलममृतकल्पं दद्युराजीवितान्तं**
**न हि कृतमुपकारं साधवो विस्मरन्ति्''।।**

ब्राह्मणस्तु राज्ञः वचनं श्रुत्वा स्वमनसि विचचार- ''अहो! राजा किमेवं वदति? किं नाम अहमुपाकरवम्? किमेतत् तथ्यं वा मिथ्या वा? अस्य प्रत्ययं पश्येयम्'' इति विचार्य राजपुत्रमपहृत्य स्वमन्दिरे संगोप्य तस्य कण्ठभूषणमेकं स्वभृत्यहस्ते दत्वा विपण्यां विक्रेतुं प्रैषयत्। अस्मिन्नवसरे राजमन्दिरे 'राजकुमारः केनापि चोरेण अपहृतो मारित' इति महान् कोलाहलः समभूत्।

राजापि पुत्रमार्गणाय सर्वत्र अधिकारिणः प्राहिणोत्। तदा ते सर्वतः परिभ्रमन्तो विपणि मध्ये दैवादाभरणहस्तं देवदत्तभृत्यमपश्यत्। ततस्तदाभरणं राजकुमारस्येति ज्ञात्वा तं बद्ध्वा राजसमीपं निन्युः।

राजापि तं दृष्ट्वा उवाच- 'रे रे भृत्य! पापिष्ठ! कथम् एतदाभरणं तव हस्ते समागतम्''?

भृत्यः- ''अहं देवदत्तस्य भृत्यः। एतदाभरणं विपणिमध्ये विक्रीय धनमानयेति तेन प्रेषितोऽस्मि''।

ततो राजा देवदत्तमाहूय एवमपृच्छत्- ''एतदाभरणं कस्ते ददौ''?

देवदत्तः- ''न कोऽपि। अहमेव धनलोलुपः तव कुमारं हत्वा तद्भूषणानि गृहीत्वा तेषामिदमेकमाभरणं विक्रेतुमदाम्। इदानीं यद्रोचते तुभ्यं तत्कुरु। मम कर्मवशादेवं बुद्धिः उत्पन्ना'' इति भणित्वा अवनतवदनः तस्थौ। तच्छ्रुत्वा राजा किमपि प्रतिकर्तुं न शशाक।

तदा सभ्यः कश्चिदाह- ''अहो! अयं सर्वधर्मशास्त्रवेत्ता। कथमीदृशे पापे कर्मणि बुद्धिमकरोत्''।

अपरः कश्चिदाह- ''किं चित्रम्? स्वकर्मणा प्रेरितस्य एवं बुद्धिरजायत।

उक्तं च-

**किं किं करोति न प्राज्ञः प्रेर्यमाणः स्वकर्मभिः।**
**प्रागेव हि मनुष्याणां बुद्धिः कर्मानुसारिणी''।।**

तत्र परे केचन राजानमब्रुवन्- ''देव! यद्ययं बालघाती पुनः स्वर्णस्तेयी च। ततः खादिरेण शूलेन हन्तव्यः''।

तदा मन्त्रिणः प्राहुः- ''इमं तिलांशखण्डान् कृत्वा एतन्मांसेन गृध्रेभ्यः बलिर्दातव्यः'' इति।

तेषां वचनं श्रुत्वा राजा जगाद- ''भोः सभ्याः! अयं मामाश्रितः पुरमार्गप्रदर्शनात् उपकारी च। अतोऽस्मिन् गुणदोषचिन्ता न कार्या।

उक्तं च-

**चन्द्रः क्षयी प्रकृतिवक्रतनुः कलङ्की**
**दोषाकरः स्फुरति मित्रविपत्तिकाले।**
**मूर्ध्ना तथापि सततं ध्रियते हरेण**
**नैवाश्रितेषु महतां गुणदोषचिन्ता।।**

किञ्च-

**उपकारिषु यस्साधुः साधुत्वे तस्य को गुणः।**
**अपकारिषु यस्साधुः स साधुस्सद्भिरुच्यते''।।**

इति भणित्वा राजा देवदत्तमवलोक्य ''सखे! किञ्चिदपि भयं चेतसि माकार्षीः। मम पुत्रो बलीयसा पुराकृतेन कर्मणा हतः। किं नाम त्वया कृतम्? प्राकृतं को वा लङ्घयितुं क्षमेत?

तथाहि-

**माता लक्ष्मीः पिता विष्णुः स्वयं च विषमायुधः।**
**तथापि शम्भुना दग्धः प्राकृतं केन लङ्घ्यते।।**

अन्यच्च-

महत्यरण्ये पतितं मां नगरम् अनीनयः किल। अत्र प्रत्युपकारसहस्रैरपि न तावकम् ऋणमपनेतुं प्रभवामि'' इति समाश्वास्य तं वस्त्राभरणादिना संभाव्य विससर्ज।

देवदत्तस्तु परमानन्दभरितः तं कुमारं स्वगृहादानीय राज्ञे ददौ। ततो विस्मितेन राज्ञा अभाणि- ''देवदत्त! किमेवं कृतम्''?

देवदत्तः- ''भोः राजन्! श्रूयताम्। त्वया सभामध्ये बहुवारं देवदत्तकृतादुपकारात् कथमुत्तीर्णो भविष्यामीति भणितम्। अतस्तव चित्तपरीक्षणार्थं मयैवं कृतम्। त्वयि प्रत्ययो दृष्टः। क्षन्तव्योऽयमपराधः''।

राजा- ''यः कृतमुपकारं विस्मरति स एव पुरुषाधमः''।

देवदत्तः- ''देव! विनापि कारणं सकलजगतामुपकरोषि। ततस्त्वमेव सुजनो लोके।

तथा चोक्तम्-

**ते सुजनास्ते धन्यास्ते कृतिनस्ते हि सुकृतिनो लोके।**
**ये कारणं विनापि च परहितकरणाय हन्त जीवन्ति''।।**

इति राजानं स्तुत्वा देवदत्तः राज्ञानुज्ञातः स्वगृहमयासीत्।

इति कथां कथयित्वा सालभञ्जिका भोजमब्रवीत्- ''राजन्! त्वयि एवमौदार्यं न विद्यते। तदिदमास्थातुं नार्हसि''। तच्छ्रुत्वा राजा तूष्णीं निर्जगाम।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. विक्रमस्य औदार्यमिति पाठ्यभागस्य सारांशं लिखत।

२. भोजराजाय सालभञ्जिकया उक्तं विक्रमस्य औदार्यं लिखत।

### २. लघुसमाधानप्रश्नाः

१. ब्राह्मणं प्रति तत्प्रेयसी किं जगाद?

२. ब्राह्मणः पुत्रप्राप्त्यर्थं कीदृशं व्रतमाचरितवान्?

३. विक्रमेण पृष्टः भृत्यः किमुत्तरमदात्?

### ३. एकपदसमाधानप्रश्नाः

१. देवदत्तः राजानं कुत्र अनीनयत्?

२. कुमारमानीय राज्ञे कः ददौ?

३. विक्रमार्कचरितं केन विरचितम्?

### ४. सन्दर्भवाक्यानि

१. सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना।

२. यः कृतमुपकारं विस्मरति स एव पुरुषाधमः।

३. नैवश्रितेषु महतां गुणदोषचिन्ता।

## विशेषतो ज्ञेयाः

### ५. कठिनशब्दार्थाः

१. अवगाह्य - प्रविश्य

२. प्राहिणोत् - प्रेषितवान्

३. मार्गणाय - अन्वेषणाय

४. खादिरेण - खदिरवृक्षावयवेन

५. उपदिदेश - उपदिष्टवान्

६. तावकम् - तव इदम्

७. प्रतिकर्तुम् - प्रतीकारं कर्तुम्

८. विपणिः - आपणः

९. अवलोक्य - दृष्ट्वा

१०. आकर्ण्य - श्रुत्वा

११. प्रायच्छत् - दत्तवान्

१२. निर्जगाम - गतवान्

१३. उपकरोषि - उपकारं करोषि

१४. प्रभवामि - शक्नोमि

१५. अपनेतुम् - दूरीकर्तुम्

१६. विससर्ज - त्यक्तवान्

## व्याकरणांशाः

### ६. सन्धयः

१. कुर्वति + उज्जयिन्याम् = कुर्वत्युज्जयिन्याम् - यणादेशसन्धिः

२. अथ + एकदा = अथैकदा - वृद्धिसन्धिः

३. ते + अब्रुवन् = तेऽब्रुवन् - पूर्वरूपसन्धिः

४. उपदेशः + अयम् = उपदेशोऽयम् - विसर्गसन्धिः

| | | | |
|---|---|---|---|
| ५. स्वधर्म + आचारम् | = स्वधर्माचारम् | | - सवर्णदीर्घसन्धिः |
| ६. पुरुष + अधमः | = पुरुषाधमः | | - सवर्णदीर्घसन्धिः |

## ७. समासाः

| | | |
|---|---|---|
| १. **सकलविद्याविचक्षणः** | - सकलविद्यासु विचक्षणः | - सप्तमीतत्पुरुषसमासः |
| २. **सकलगुणालङ्कृतः** | - सकलगुणैः अलङ्कृतः | - तृतीयातत्पुरुषसमासः |
| ३. **आभरणहस्तम्** | - आभरणं हस्ते यस्य सः, तम् | - बहुव्रीहिसमासः |
| ४. **धनलोलुपः** | - धने लोलुपः | - सप्तमीतत्पुरुषसमासः |
| ५. **अवनतवदनः** | - अवनतं वदनं येन सः | - बहुव्रीहिसमासः |
| ६. **सर्वधर्मशास्त्रवेत्ता** | - सर्वधर्मशास्त्राणां वेत्ता | - षष्ठीतत्पुरुषसमासः |
| ७. **पुरुषाधमः** | - पुरुषेषु अधमः | - सप्तमीतत्पुरुषसमासः |

## ८. धातवः

| | | | |
|---|---|---|---|
| १. आरेभे | आरेभाते | आरेभिरे | - रभ-राभस्ये, लिट् प्रथमपुरुषैकवचनम् |
| २. प्रायच्छत् | प्रायच्छताम् | प्रायच्छन् | - दाण्-दाने, लङ् प्रथमपुरुषैकवचनम् |
| ३. अकार्षीत् | अकार्ष्टाम् | अकार्षुः | - डुकृञ्-करणे, लुङ् प्रथमपुरुषैकवचनम् |
| ४. उपदिदेश | उपदिदिशतुः | उपदिदिशुः | - दिश-अतिसर्जने, लिट् प्रथमपुरुषैकवचनम् |
| ५. जगाम | जग्मतुः | जग्मुः | - गम्लृ-गतौ, लिट्, प्रथमपुरुषैकवचनम् |
| ६. उवास | ऊषतुः | ऊषुः | - वस-निवासे, लिट्, प्रथमपुरुषैकवचनम् |
| ७. अनीनयत् | अनीनयताम् | अनीनयन् | - नीञ्-प्रापणे, लुङ्, प्रथमपुरुषैकवचनम् |
| ८. न्ययुङ्क्त | न्ययुञ्जाताम् | न्ययुञ्जत | - युजिर्-योगे, लुङ्, प्रथमपुरुषैकवचनम् |

| | | | |
|---|---|---|---|
| ९. विचचार | विचेरतुः | विचेरुः | - चर-गतौ, लिट्, प्रथमपुरुषैकवचनम् |
| १०. प्राहिणोत् | प्रहिणुताम् | प्रहिण्वन् | - हि-गतौ, लङ्, प्रथमपुरुषैकवचनम् |
| ११. निनाय | निन्यतुः | निन्युः | - नीञ्-प्रापणे, लिट्, प्रथमपुरुषैकवचनम् |
| १२. अयासीत् | अयासिष्टाम् | अयासिषुः | - या-प्रापणे, लुङ्, प्रथमपुरुषैकवचनम् |
| १३. अभाणि | अभाणिषाताम् | अभाणिषत | - भण-शब्दार्थः कर्मणि लुङ्, प्रथमपुरुषैकवचनम् |
| १४. विधेहि | विधत्तात् | विधत्त | - डुधाञ्- धारणपोषणयोः, लिट्, मध्यमपुरुषैकवचनम् |
| १५. अनुसरेः | अनुसरेतम् | अनुसरेत | - अनु उपसर्गपूर्वक सृ-गतौ धातोः, विधि लिङ्, मध्यमपुरुषैकवचनम् |
| १६. अवादीत् | अवादिष्टाम् | अवादिषुः | - वद व्यक्तायां-वाचि, लुङ्, प्रथमपुरुषैकवचनम् |

# ३ राजवाहनजननम्

महाकविदण्डि:

## परिचय:

प्राचीनसंस्कृतसाहित्ये दण्डिमहाकवेः विशेषस्थानं वर्तते। अवन्तिसुन्दरीकथानुसारं दण्डिमहाकविः भारवेः प्रपौत्रः। विदर्भदेशे अचलपुरनिवासेषु ब्राह्मणेषु नारायणस्वामी प्रसिद्धः। तस्य पुत्र एव भारविः। भारवेः सुतः मनोरथः। मनोरथस्य चतुर्थपुत्रः वीरदत्तः। एतस्य भार्या गौरी। एतयोः पुत्र एव दण्डी। दण्डी बाल्यावस्थायामेव स्वपित्रोः वियोगं प्राप्तवान्। **त्रयो दण्डिप्रबन्धाः त्रिषु लोकेषु विश्रुताः** इति राजशेखरोक्तिः। ते च काव्यादर्शः, अवन्तिसुन्दरीकथा, दशकुमारचरितम् इति। **दण्डिनः पदलालित्य**मिति आर्योक्तिः। तच्च एतेषु प्रबन्धेषु स्पष्टं दरीदृश्यते।

### पाठ्यभागपरिचयः

प्रस्तुतपाठ्यभागः दशकुमारचरितस्य पूर्वपाठिकायां प्रथमोच्छ्वासात् स्वीकृतः। मगधदेशस्य राजा राजहंसः। तस्य राजमहिषी वसुमती। तस्य राजधानी पुष्पपुरी। तस्य त्रयः अमात्या आसन्। तेषु मन्त्रिषु स्वर्गं गतेषु मन्त्रिसूनवः तत्तत्स्थानानि अलंचक्रुः। एकदा बलगर्वितः राजहंसः मालवदेशाधिपतिं मानसारं युद्धे पराजित्य पुनः तमेव सिंहासने प्रतिष्ठापयामास। अनन्तरं राज्ञी अपि विष्णोः वरप्रसादेन गर्भमधत्त।

कदाचित् एकः गूढचारी राजानमेवमवोचत्। मालवाधिपतिः मानसारः परमेश्वर-माराध्य भयदां गदां प्राप्य भवन्तमभियोद्धुमागच्छतीति। राजहंसोऽपि अमात्यानां विज्ञापनानि अनादृत्य योद्धुमनाः बभूव। मानसारः मगधदेशं प्रविश्य राजहंसेन युद्धमकरोत्। तस्मिन् घोरसंग्रामे जयाकांक्षी मानसारः राजहंसोपरि गदां प्रायुङ्क्त। तया राजा मूर्छितोऽभवत्।

अश्वाः तं नीत्वा महारण्यं प्राविशन्। अमात्याः राज्ञः अनवलोकनेन महद्दुःखिताः देवीमवाप्य सर्वमुदन्तमवोचन्। दुःखसागरमग्ना सा मर्तुकामा यत्र राजहंसः अश्वैरानीतः तत्रैव अगच्छत्। राजहंसः तस्याः कण्ठरवं श्रुत्वा परमानन्दभरितः अभवत्।

तदनन्तरं सकलसैन्ययुतः सः तपोधनेन वामदेवेन समाश्वासितः कञ्चन कालं तूष्णीमतिष्ठत्। ततः वसुमती सकललक्षणसमन्वितं राजवाहननामानं सुतमसूत। सः अमात्यपुत्रैस्सह अवर्धत।

## पाठ्यभागः

अस्ति समस्तनगरीनिकषायमाणा मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी। तत्र रचितदिगन्तरालपूर्त्या कीर्त्या अभिहितः सुरभितः विरचितारातिसन्तापेन प्रतापेन सततुलितवियन्मध्यहंसो राजहंसो नाम भूपो बभूव। तस्य वसुमती नाम सुमती लीलावती कुलशेखररमणी रमणी बभूव।

तस्य राज्ञः परमविधेयाः धर्मपाल-पद्मोद्भव-सितवर्मनामधेयाः कुलामात्याः त्रयः अभवन्। तेषां सितवर्मणः सुमति-सत्यवर्माणौ, धर्मपालस्य सुमन्त्र-सुमित्र-कामपालाः, पद्मोद्भवस्य सुश्रुत-रत्नोद्भवौ इति तनयाः समभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत्। दुर्विनीतः कामपालो जनकाग्रजन्मनः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरन्दरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्।

ततः कदाचित् मगधनायको मालवेश्वरं मानसारं प्रति सहेलं चतुरङ्गबलेन संयुतः संग्रामाभिलाषेन रोषेण महताविष्टः निर्ययौ। मालवनाथोऽपि साग्रहो अभिमुखीभूय भूयो निर्जगाम। तयोः अथ शस्त्राशस्त्रि-हस्ताहस्ति-परस्पराभिहतसैन्यं जन्यम् अजनि। तत्र मगधराजः प्रक्षीणसकलसैन्यमण्डलं मालवराजं जीवग्राहम् अभिगृह्य कृपालुतया पुनरपि

स्वराज्ये प्रतिष्ठापयामास। ततः सः अनपत्यतया नारायणं सकललोककारणं निरन्तरम् अर्चयामास। अथ कदाचित् तदग्रमहिषी देवी देवेन ''कल्पवल्लीफलम् आप्नुहि'' इति प्रभातसमये सुस्वप्नम् अवलोकितवती। सा तदा गर्भमधत्त। राजा अपि निजसम्पन्नमनो-रथानुरूपं देव्याः सीमन्तोत्सवं व्यधत्त।

एकदा सुहृन्मन्त्रिपुरोहितैः सभायां सिंहासनासीनो द्वारपालेन व्यज्ञापि-''देव! देवसन्दर्शनलालसमानसः कोऽपि विशिष्यार्चनार्हो यतिः द्वारदेशम् अध्यास्ते'' इति। तदनुज्ञातेन स संयमी नृपसमीपम् अनायि। भूपतिरायान्तं तं विलोक्य मन्त्रिजनसमेतः प्रणतमेनं मन्दहासमभाषत। ''ननु तापस! देशं सापदेशं भ्रमन् तत्र तत्र भवदभिज्ञातं कथयतु'' इति। तेन अभाषि- ''देव! मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानः तस्य राज्ञः समस्तम् उदन्तजातं विदित्वा प्रत्यागमम्। मानसारः भवतः पराजयमनुभूय वीतदयो महाकालनिवासिनं महेश्वरं समाराध्य तपःप्रभावसन्तुष्टात् अस्मात् एकवीरारातिघ्नीं भयदां गदां लब्ध्वा आत्मानमप्रतिभटं मन्यमानो भवन्तमभियोक्तुमुद्युङ्क्ते। ततः परं देव एव प्रमाणम् इति''।

तदालोच्य निश्चिततत्कृत्यैरमात्यै राजा विज्ञापितोऽभूत्-''देव! देवसहायेन योद्धुमरातिरायाति। तस्मादस्माकं युद्धं सांप्रतमसाम्प्रतम्। सहसा दुर्गसंश्रयः कार्यः'' इति। तैर्बहुधा विज्ञापितोऽप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमनाः बभूव। शितिकण्ठदत्तशक्तिसारो मानसारो योद्धुमनसाम् अग्रीभूय सामग्री-समेतोऽक्लेशं मगधदेशं प्रविवेश। तदा तदाकर्ण्य मन्त्रिणो भूमहेन्द्रं मगधेन्द्रं कथञ्चिदनुनीय रिपुभिरसाध्ये विन्ध्याटवीमध्येऽवरोधान्मूलबलरक्षितान्निवेशयामासुः। राजहंसस्तु दैन्यसैन्यसमेतः तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध। परस्परबद्धवैरयोरेतयोः शूरयोस्तदा रणे वर्तमाने जयाकाङ्क्षी मालवदेशरक्षी मगधेश्वरस्य उपरि पुरा पुरारातिदत्तां गदां प्राहिणोत्। सा गदा सूतं निहत्य रथस्थं राजानं मूर्छितमकार्षीत्।

ततो अश्वा रथमादाय दैवगत्यान्तःपुरशरण्यं महारण्यं प्राविशन्। मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं समाक्रम्य पुष्पपुरमध्यतिष्ठत्। तत्र अमात्याः राजानं अनवलोकितवन्तो दैन्यवन्तो देवीमवापुः। वसुमती तु तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकर्ण्योद्विग्ना शोकसागरमग्ना रमणानुगमने मतिं व्यधत्त। "कल्याणि! भूरमणमरण-मनिश्चितम्। किञ्च दैवज्ञकथितो मथितोद्धतारातिः सार्वभौमोभिरामो भविता सुकुमारः कुमारस्त्वदुदरे वसति। तस्मादद्य तव मरणमनुचितम्" इति। भूषितभाषितैरमात्यपुरोहितैः अनुनीयमानया तया क्षणं क्षणहीनया तूष्णीमस्थायि।

अथार्धरात्रे निद्रानिलीननेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवती सेनानिवेशदेशं निःशब्दलेशं शनैरतिक्रम्य यस्मिन्नथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमाः क्षमापतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठंस्तस्य निकटवटतरोः शाखायां मृतिरेखायामिव क्वचिदुत्तरीयार्द्धेन बन्धनं मृतिसाधनं विरच्य मर्तुकामाभिरामा साश्रुकण्ठा व्यलपत्- "भूनायक! भवानेव भाविन्यपि जन्मनि वल्लभो भवतु" इति। तदाकर्ण्य मागधो देवीवाक्यमिव निश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्तामाह्वयत्। सा ससंभ्रममागत्य अमन्दहृदयानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्यामिवानिमिषिताभ्यां लोचनाभ्यां पिबन्ती विकस्वरेण स्वरेण पुरोहितामात्यजनमुच्चैराहूय तेभ्यस्तमदर्शयत्।

राजा प्रशंसितदैवमाहात्म्यैरमात्यैरभाणि-"देव! रथ्यचयः सारथ्यमपगमे रथं रभसात् अरण्यमनयत्" इति। "तत्र निहतसैनिकग्रामे संग्रामे मालवपतिना आराधितपुरारातिना गदया दयाहीनेन ताडितो मूर्छामागत्यात्र वने निशान्तपवनेन बोधितोऽभवम्" इति महीपतिरकथयत्। ततो मन्त्रिनिवहेन विरचितदैवानुकूल्येन कालेन शिबिरमानीय अपनीताशेषशल्यो विकसितनिजाननारविन्दो राजा सहसा विरोपितव्रणोऽकारि। मगधाधिपतिरधिकाधिरमात्यसंमत्या मृदुभाषितया तया वसुमत्या समबोधि-

"देव! सकलस्य भूपालकुलस्य मध्ये भवानद्य विन्ध्यवनमध्यं निवसति इति, जलबुद्बुदसमाना सम्पत्तटिल्लतेव सहसैव उदेति नश्यति च। तन्निखिलं दैवायत्तमेवावधार्यं कार्यम्। किञ्च पुरा हरिश्चन्द्ररामचन्द्रमुख्या असंख्या महीन्द्रा ऐश्वर्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेककालं निजराज्यमकुर्वन्। तद्वदेव भवान्भविष्यति। कञ्चन कालं विरचितदैवसमाधिः तिष्ठतु तावत्" इति।

ततः सकलसैन्यसमन्वितो राजहंसः वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं जगाम। तं प्रणम्य तेन कृतातिथ्यः तस्मै कथितकथ्यस्तदाश्रमे कञ्चन कालमुषित्वा निजराज्याभिलाषी सोमकुलावतंसो मुनिमभाषत- "भगवन्! मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति। तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवम्" इति।

ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत्-"सखे! शरीरकार्श्यकारिणा तपसालम्। वसुमतीगर्भस्थः सकलरिपुकुलमर्दनो राजनन्दनो नूनं सम्भविष्यति, कञ्चन कालं तूष्णीमास्स्व" इति। गगनचारिण्यापि वाण्या सत्यमेतत् इति तदेव अवाचि। राजापि मुनिवाक्यमङ्गीकृत्यातिष्ठत्। ततः वसुमती सुमुहूर्ते सकललक्षणलक्षितं सुतमसूत। ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालङ्कारेण च विराजमानं राजवाहननामानं व्यधत्त। तस्मिन्नेव काले सुमति-सुमित्र-सुमन्त्र-सुश्रुतानां मन्त्रिणां प्रमति-मित्रगुप्त-मन्त्रगुप्त-विश्रुताख्याः सूनवो चिरायुषः समजायन्त। राजवाहनो मन्त्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्धत।

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. राजहंसः कः? तस्य नगरी का?

२. धर्मपालस्य कति पुत्राः? ते च के?

३. मानसारः कथं गदां प्राप्तवान्?

### २. एकपदसमाधानप्रश्नाः

१. राजवाहनः कस्य पुत्रः?

२. राजहंसस्य पत्नी का?

३. दशकुमारविरचितं केन विरचितम्?

## व्याकरणांशाः

### ३. सन्धयः

| | | |
|---|---|---|
| १. मालवनाथः + अपि | = मालवनाथोऽपि | - विसर्गसन्धिः |
| २. अनु + अतिष्ठम् | = अन्वतिष्ठम् | - यणादेशसन्धिः |
| ३. सीमन्त +उत्सवम् | = सीमन्तोत्सवम् | - गुणसन्धिः |
| ४. तत् + अनुज्ञातेन | = तदनुज्ञातेन | - जश्त्वसन्धिः |
| ५. मगध + ईश्वरस्य | = मगधेश्वरस्य | - गुणसन्धिः |
| ६. अधि + अतिष्ठत् | = अध्यतिष्ठत् | - यणादेशसन्धिः |
| ७. मथित + उद्धताराति: | = मथितोद्धताराति: | - गुणसन्धिः |
| ८. सहसा + एव | = सहसैव | - वृद्धिसन्धिः |
| ९. बाल + अलङ्कारेण | = बालालङ्कारेण | - सवर्णदीर्घसन्धिः |

## ४. कठिनशब्दार्थाः

| | |
|---|---|
| १. अध्यास्ते | - तिष्ठति |
| २. निश्चिन्वानः | - निश्चयं कुर्वन् |
| ३. उपोषिताभ्याम् | - जातोत्कण्ठाभ्याम् |
| ४. रथ्यचयः | - अश्वसमुदायः |
| ५. रभसात् | - वेगेन |
| ६. सारथ्यपगमः | - सारथेः नाशः |
| ७. पुरोधसम् | - उपाध्यायम् |
| ८. जीवग्राहम् | - जीवन्तम् |
| ९. ससम्भ्रमम् | - सादरम् |
| १०. क्षमापतिरथ्याः | - भूपतेः अश्वाः |
| ११. निःशब्दलेशम् | - कंचित् शब्दं विना |
| १२. उन्मूलयिष्यामि | - नाशयिष्यामि |
| १३. सेनानिवेशदेशः | - सेनाशिबिरप्रदेशः |
| १४. सकलरिपुमर्दनः | - सकलशत्रूणां नाशकः |

## ५. समासाः

| | | |
|---|---|---|
| **१. कथितकथ्यः** | - कथितं कथ्यं येन सः | - बहुव्रीहिसमासः |
| **२. कृतातिथ्यः** | - कृतम् आतिथ्यं येन सः | - बहुव्रीहिसमासः |
| **३. शस्त्राशस्त्रि** | - शस्त्रैः शस्त्रैः इदं युद्धं प्रवृत्तम् | - बहुव्रीहिसमासः |

| | | |
|---|---|---|
| ४. **हस्ताहस्ति** | - हस्ताभ्यां हस्ताभ्यां इदं युद्धं प्रवृत्तम् | - बहुव्रीहिसमासः |
| ५. **शरीरकार्श्यकारिणा** | - शरीरकार्श्यं करोतीति शरीरकार्श्यकारी, तेन | - कृद्वृत्तिः |
| ३. **रचितदिगन्तरालपूर्त्या** | - दिशाम् अन्तरालम् दिगन्तरालम् | -षष्ठीतत्पुरुषः |
| | - दिगन्तरालस्य पूर्तिः दिगन्तरालपूर्तिः | - षष्ठीतत्पुरुषः |
| | - रचिता दिगन्तरालपूर्तिर्यस्यास्सा, तया | - बहुव्रीहिसमासः |
| ४. **विरचितारातिसंतापेन** | - अरातीनां सन्तापः अरातिसन्तापः | - षष्ठीतत्पुरुषः |
| | - विरचितः अरातिसन्तापः यस्य सः,तेन | - बहुव्रीहिसमासः |
| ५. **सतततुलितवियन्मध्यहंसः** | - सततं तुलितः सतततुलितः | - सुप्सुपासमासः |
| | - वियतः मध्यं वियन्मध्यम् | - षष्ठीतत्पुरुषः |
| | - वियन्मध्ये हंसः वियन्मध्यहंसः | - सप्तमीतत्पुरुषः |
| | - सतततुलितः वियन्मध्यहंसः यस्य सः | - बहुव्रीहिसमासः |
| ६. **वाणिज्यनिपुणतया** | - निपुणस्य भावः निपुणता | - तद्धितवृत्तिः |
| | - वाणिज्ये निपुणता, तया | - सप्तमीतत्पुरुषः |
| ७. **निजसम्पन्मनोरथरूपम्** | - निजा च सा सम्पच्च - निजसम्पत् | -वि.पू. कर्मधारयः |
| | - निजसम्पदः मनोरथः - निजसम्पन्मनोरथः | - षष्ठीतत्पुरुषः |
| | - निजसम्पन्मोरथस्य रूपम् | - षष्ठीतत्पुरुषः |
| ८. **देवसन्दर्शनलालसमानसः** | - देवस्य संदर्शनं - देवसंदर्शनम् | - षष्ठीतत्पुरुषः |
| | - देवसन्दर्शने लालसं- देवसन्दर्शनलालसम् | - सप्तमीतत्पुरुषः |
| | - देवसन्दर्शनलालसं मानसं यस्य सः | - बहुव्रीहिसमासः |
| ९. **शितिकण्ठदत्तशक्तिसारः** | - शितिः कण्ठः यस्य सः शितिकण्ठः | - बहुव्रीहिसमासः |
| | - शक्तेः सारः - शक्तिसारः | - षष्ठीतत्पुरुषः |
| | - शितिकण्ठेन दत्तः शितिकण्ठदत्तः | - तृतीयातत्पुरुषः |

| | | |
|---|---|---|
| | - शितिकण्ठदत्तः शक्तिसारः यस्य सः | - बहुव्रीहिसमासः |
| **१०. आराधितपुरारातिना** | - पुराणाम् अरातिः पुरारातिः | - षष्ठीतत्पुरुषः |
| | - आराधितः पुरारातिः येन सः, तेन | - बहुव्रीहिसमासः |
| **१२. अपनीताशेषतुल्यः** | - न विद्यते शेषः एषां ते अशेषाः | - बहुव्रीहिसमासः |
| | - अशेषाश्च ते शल्याश्च अशेषशल्याः | - वि.पूर्व.कर्मधारयः |
| | - अपनीताः अशेषतुल्याः यस्य सः | - बहुव्रीहिसमासः |
| **१३. ऐश्वर्योपमितमहेन्द्राः** | - महान् चाऽसौ इन्द्रश्च | - वि.पूर्व.कर्मधारयः |
| | - ऐश्वर्येण उपमितः ऐश्वर्योपमितः | - तृतीयातत्पुरुषः |
| | - ऐश्वर्योपमितः महेन्द्रः येषां ते | - बहुव्रीहिसमासः |

**१६.अमन्दहृदयानन्द-**

| | | |
|---|---|---|
| **सम्फुल्लवदनारविन्दा** | - न मन्दः अमन्दः | - नञ् तत्पुरुषः |
| | - हृदयस्य आनन्दः  हृदयानन्दः | - षष्ठीतत्पुरुषः |
| | - अमन्दश्चाऽसौ हृदयानन्दश्च अमन्दहृदयानन्दः | - वि.पूर्व.कर्मधारयः |
| | - अमन्दहृदयानन्देन सम्फुल्लम् | - तृतीयातत्पुरुषः |
| | - अरविन्दमिव वदनम् वदनारविन्दम् | - उ.पूर्व.कर्मधारयः |
| | - अमन्दहृदयानन्दसम्फुल्लं वदनारविन्दं यस्याः सा | - बहुव्रीहिसमासः |

# ४ आपर्याप्तः समयः

आचार्य.राणि.सदाशिवमूर्तिः

## परिचयः

पाठ्यभागोऽयम् आचार्य.राणि.सदाशिवमूर्तिमहोदयेन रचितः। एतेषां जननं १९५८ वर्षे अभवत्। एते संस्कृत-आन्ध्र-आङ्ग्लभाषासु ज्योतिश्शास्त्रे वेदान्तशास्त्रे च कृतभूरिपरिश्रमाः। एतैः वदतसंस्कृतम्, नवरत्नदीपिका, चाक्षुषयुग्मम्, मनोन्मनीत्यादयो अनेके ग्रन्थाः संरचिता वर्तन्ते। सदाशिवमूर्तिमहोदयाः संस्कृतबन्धु-विजयश्री-प्रज्ञाभास्कर-साहित्यअकादमीपुरस्कारः इत्यादिभिः पुरस्कारैः सभाजिताः। एवं रीत्या संस्कृतसाहित्य वैदग्ध्यं सम्पाद्य देशान्तरमपि गत्वा तत्रापि सम्मानिता एते महाशयाः तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे शैक्षिकसंकायप्रमुखरूपेण साहित्यविभागाधिपतित्वेन च कार्यं कुर्वन्तस्सन्तो विराजन्ते।

### पाठ्यभागपरिचयः

श्रीधरः मम समयः नास्ति इति भावनया तस्य जीवने कीदृशकष्टान्यनुभूतवानिति तस्य व्यवहारेण स्वपितरौ च कथं बाधामनुभूतवन्तौ इति, स्वव्यवहारेण लभात्परं नष्टमेवाधिकमिति बोधयितुं पाठ्यभागरूपेण स्वीकृतोऽयं पाठ्यांशः।

## पाठ्यभागः

तदानीं श्रीधरोऽहं दशहायनः। रात्रौ अष्टवादनसमयः। मम पुरतः पाठ्यपुस्तकानि सर्वाणि प्रसार्य पाठशालायां दत्तं गृहकार्यं कुर्वन्नासम्। मातुः वेदवत्याः स्वास्थ्यं समीचीनतया नासीत्। कासस्य प्रभावः अधिकतरो अवर्तत। मासः मार्गशीर्षः। शीतवायवः विजृम्भमाणाः आसन्।

यथा अहं गृहेऽपि पाठशालाकार्यं कुर्वन्नस्मि तथा मम पिता श्रीनिवासनामापि गृहे कार्यालयकार्यं कुर्वन्नासीत्। मातुः कासध्वनिं श्रुत्वा पिता मामाहूय- ''मातुः कासहरौषधम् आनय! धनं ददामि'' इति प्रोवाच। अत्रान्तरे कासकषायितकण्ठस्वनेनैव माता- ''तं मा प्रेषयतु भवान्! सः पठन्नस्ति। बह्वल्पीयसि समये तेन बहु पठनीयमस्ति। कथञ्चिदहमेव गत्वा औषधमानयामि'' इत्युक्त्वा स्वमञ्चादुत्थितवती। परन्तु सा स्थातुमपि क्षीणशक्तिरासीत्। अधः पतिता। पिता स्वकीयं कार्यं त्यक्त्वा तां मञ्चे पुनरशाययत्। मम बाल्यम् तादृशम्। अहं पठितुमेव जन्मालभे न तु गृहसेवार्थमित्यभावयम्। गृहसेवाप्यात्मसेवेति भावनैव नासीत्।

अतीतम् तथा मे बाल्यम्। कलाशालायां प्राविशमहम्। मध्ये मध्ये पिता गृहकार्ये मत्साहाय्यमपेक्षमाणः मह्यं किमपि किमपि कथयन्नासीत्। अहं तु सर्वदा मनसाऽपि बधिर एवासम्। माता तु सर्वदा 'तेन बहु पठनीयमस्ति। समयस्तु स्वल्पो वर्तते' इत्येव कथयति स्म। मम मनसि एकैव भावना। अहं पठितुमेव जन्मालभे न तु गृहसेवार्थमिति। गच्छत्सु वर्षेषु मातुः कासोऽपि मम ज्येष्ठभ्रातृवद्वर्धते। एतद्विषयेऽहं मनसा अन्ध एवासम्।

अहं मम विश्वविद्यालयाध्ययनक्रमे अनुसन्धानविधौ चरमे वर्षे आसम्। शोधग्रन्थसमर्पणाय तिथिरासन्नवर्ती आसीत्। बहूनि मे कार्याणि। अहं शोधग्रन्थसमर्पणार्थं यदा कार्यरतोऽभवम् तदा रात्रावेकस्मिन् पिता मत्सकाशमागत्य '' रे! मातुः स्थितिः सम्यक् नास्ति। कासस्तु तीव्रतमो वर्तते। वैद्यकस्य सकाशं नयावः। आगच्छसि किम्''? इत्यपृच्छत्।

अहं मुहूर्तं स्थित्वाऽवोचम्। पितः! श्वः मया शोधग्रन्थसमर्पणं करणीयमस्ति। अल्पस्तु कालः कर्तव्यानि बहूनि। अतः .... इत्यहं मध्ये एव स्थगितवान्। मञ्चस्था माता समन्दहासं मन्दस्वरेण ''तं तस्य कार्ये त्यजाव:'' इति कासकषायितकण्ठा गद्गदस्वरेणावोचत्।

अहं मुक्तः इति दीर्घं निश्वस्य मम कार्ये निमग्नोऽहम्। पिता तां चिकित्सालयमनयत्। वैद्यकस्यानुक्षणानुशीलनार्थं सा चिकित्सालये एव प्राविशत्।

कथं दिनद्वयमतीतमित्यहमजानन्नेव कालं यापितवान्। शोधग्रन्थस्समर्पितो मया। मध्याह्नभोजनार्थमहं गृहमागतवान्। मातुः पार्थिवं शरीरं गृहद्वारदेशे पार्श्वे स्थापितम्। बान्धवास्सर्वे समागताः। उत्तरक्रियास्सर्वाः अपि समाप्ताः। दिनानि गच्छन्ति। पिता निर्वेददृष्टिरेवासीत् । मत्तः साहाय्यं किमपि नापेक्षते स्म। पिता एव स्वयं पचति आवयोर्द्वयोः कृते। स्वकार्यालयकार्ये निमग्नस्सन्नपि ममक्षेमविषयेऽपि बद्धदृष्टिरासीत् सः। जीविका-सम्पदनाभिलाषिणा मया कालगमनवेगः नावलोकितः। अतीतः पुनरेको वर्षः। अहं मम पि.हेच् डि उपाधिं प्राप्नवम्। तदनुपदमेव विश्वविद्यालयेऽध्यापकोऽप्यभवम्। मम पितृष्वसा आगत्य पित्रा साकं वार्तालापं कृत्वा स्वपुत्रीं मह्यं दातुं प्रस्तावमकरोत्। पित्रापि नेति नोक्तम्। मयाप्योमित्येवोक्तम्। अहमूढो जातः। लोकव्यवहारमूढोऽपिजातः।

पिता स्वपदवीनिवृत्तोऽभवत्। अध्यात्मचिन्तनप्रवृत्तोऽभवत्। मत्तः तस्य काप्यपेक्षा नासीत्। एवं वर्षदशकं जातम्। विश्वविद्यालयेऽहं उत्तमाध्यापकः इति सपुरस्कारप्रशंसां बहुवारं प्राप्नवम्। पिता एकदा मामाहूय "इतोऽपि कियत्कालमहं जीविष्यामीति निर्धारणा नास्ति। परन्तु अन्तिमयात्रातः पूर्वमेवाहमेकवारं काशीक्षेत्रं गन्तुकामोऽस्मि। मां तत्र नयसि किम्"? इति अपृच्छत्। अहं दीर्घं निश्वस्य "पितः! अवश्यं नेष्यामि, परन्तु न त्विदानीम्, समयाभावात्। यतः माम् विश्वविद्यालयनवानुसन्धानव्यवस्थाकल्पनार्थं अध्ययनबृन्दस्य नेतारं कृत्वा अमेरिकादेशं प्रेषयितुमिच्छन्ति अस्माकं कार्यालयाधिकारिणः। अस्मिन्नेव सप्ताहे मया गन्तव्यम्। अतः ममागमनानन्तरं नेष्यामि" इत्यवोचम्।

पिता निर्भावमेदुरः गीतापठनदृष्टिरेवासीत्। अहममेरिकादेशं गत्वा मासत्रयानन्तरं स्वगृहं प्रत्यागतवान्। यदाऽहं गृहं प्रविशन्नासम् गृहप्राङ्गणे पितुः मृतकलेबरदर्शनमलभे।

वैद्यका:- ''पितु: सुदीर्घकालतोऽपि हृद्रोगपीडा स्यात्। स्वस्वास्थ्यमलक्ष्य व्यवहृतवान् स्यात्। पर्यवसानमिदम्'' इति वदन्त: निर्गतवन्त:। कालोचितक्रियास्सर्वा अपि निरूढा:।

बाल्यादपि मे काल: प्रचलन्नेवासीत्। इदानीं तु कालो धावति स्म। इतोऽपि विंशतिवर्षा: अतीता:। मम पुत्र: पुत्री च प्रवृद्धौ। गृहं कथं प्रचलतीति दृष्टिर्मे नासीत्। तथा गृहपालनमकरोन्मे गृहिणी। पुत्रोऽपि मे विदेशेषूपाधिं प्राप्तवान्। पुत्र्या: विवाहयत्ने निमग्ना मम पत्नी। अहं तु सर्वदा कार्यरत: एव। मम तु गृहविषयावेक्षणार्थं पर्याप्तसमयो न वर्तते। मम पत्न्या: अपि मत्त: विशेषापेक्षा कापि नासीत्। कदा रात्रिर्भवति कदा दिवस: भवतीति गणनापि नासीन्मे। शततमं पुस्तकं व्यरचयमहम्। तस्याविष्कारोत्सव: सप्ताहाभ्यन्तरे भविष्यतीति निश्चयो जात:।

तदानीं मम हृदये वेदानानुभूता। मम पत्नी मां वैद्यकसकाशं नीतवती। ''श्रीधर! अधिककार्यभारवशात् हृद्रोग: सम्प्राप्त:। कञ्चित्कालं यावत् विश्रान्तिरपेक्षिता। एतदौषधसेवनं नियतरूपेण करणीयं भवता'' इत्यवोचत् वैद्यक:। शिरसा यद्यपि आमित्युक्तवान् तथापि मनसा तु वैद्यकसूचनाविषये बधिर एवासमहम्। मम पत्नी तु औषधानि समये समये मह्यमयच्छत्। अहं तु कदाचित् स्वीकरोमि। कदाचित् मम संगणकयन्त्रोत्पीठिकाया: उपर्येव त्यज्यन्तेऽसेवितौषधानि। उत्तरदिने मे पुस्तकाविष्कार:। रात्रौ मम प्रकोष्ठे मम पत्न्या स्थापितान्यौषधानि तत्रैवासन्। औषधसेवनार्थमपि पर्याप्तसमय: नासीत्। हृदयवेदाना आरब्धा। औषधमिदं वाक्यं समाप्य स्वीकरोमीति टङ्कणं कुर्वन्नासम्। हृदयवेदना तीव्रतमा आसीत्। टङ्कणं कर्तुं वा समीपे विद्यमानमौषधं स्वीकर्तुं वापि पर्याप्तसमय: नास्त्येव। मम हृदयकोशगता चरमश्वासहंसिका शरीरान्मे निर्गता।

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. श्रीधरः स्वमातुः मरणसमये किं कुर्वन्नासीत्?

२. मार्गशीर्षमासः कीदृशः आसीत्?

३. वैद्यः श्रीधरं प्रति किमुक्तवान्?

### २. एकपदसमाधानप्रश्नाः

१. श्रीधरस्य ज्येष्ठभ्रातृवत् कः वर्धते?

२. अपर्याप्तः समयः इति पाठ्यभागः केन विरचितः?

३. श्रीधरस्य मातुः नाम किम्?

## व्याकरणांशाः

### ३. सन्धयः

| | | |
|---|---|---|
| १. कर्णयोः + इव | = कर्णयोरिव | - रेफादेशसन्धिः |
| २. कासहर + औषधम् | = कासहरौषधम् | - सवर्णदीर्घसन्धिः |
| ३. कण्ठस्वनेन + एव | = कण्ठस्वनेनैव | - वृद्धिसन्धिः |
| ४. ददामि + इति | = ददामीति | - सवर्णदीर्घसन्धिः |
| ५. कथञ्चित् + अहमेव | = कथञ्चिदहमेव | - जश्त्वसन्धिः |
| ६. क्षीणशक्तिः + आसीत् | = क्षीणशक्तिरासीत् | - रेफादेशसन्धिः |
| ७. गृहसेवा+ अपि | = गृहसेवापि | - सवर्णदीर्घसन्धिः |
| ८. इति+ एव | = इत्येव | - यणादेशसन्धिः |

| | | |
|---|---|---|
| ९. एतानि + अपि | = एतान्यपि | - यणादेशसन्धिः |
| १०. बहु + अल्पीयसि | = बह्वल्पीयसि | - यणादेशसन्धिः |
| ११. विषये + अहम् | = विषयेऽहम् | - पूर्वरूपसन्धिः |
| १२. रात्रौ + एकस्मिन् | = रात्रावेकस्मिन् | - अयवायावसन्धिः |
| १३. न + अवलोकितः | = नावलोकितः | - सवर्णदीर्घसन्धिः |
| १४. कापि + अपेक्षा | = काप्यपेक्षा | - यणादेशसन्धिः |

## ४. समासाः

| | | |
|---|---|---|
| १. **शीतवायवः** | - शीताश्च ते वायवश्च | - वि.पू.कर्मधारयः |
| २. **आत्मसेवा** | - आत्मनः सेवा | - षष्ठीतत्पुरुषसमासः |
| ३. **कार्यरतः** | - कार्ये रतः | - सप्तमीतत्पुरुषसमासः |
| ४. **गृहप्राङ्गणे** | - गृहस्य प्राङ्गणे | - षष्ठीतत्पुरुषसमासः |
| ५. **पाठशालाकार्यम्** | - पाठशालायाः कार्यम् | - षष्ठीतत्पुरुषसमासः |
| ६. **कार्यालयकार्यम्** | - कार्यालयस्य कार्यम् | - षष्ठीतत्पुरुषसमासः |
| ७. **न पर्याप्तस्समयः** | - अपर्याप्तस्समयः | - नञ् तत्पुरुषसमासः |
| ८. **गृहसेवार्थम्** | - गृहस्य सेवार्थम् | - षष्ठीतत्पुरुषसमासः |
| ९. **काशीक्षेत्रम्** | - काशी इति क्षेत्रम् | - सं.पूर्व.कर्मधारयः |
| १०. **वैद्यसकाशम्** | - वैद्यस्य सकाशम् | - षष्ठीतत्पुरुषसमासः |

# ५ भिषजः भैषज्यम्

महामहोपाध्याय पुल्लेल.श्रीरामचन्द्रः

## परिचयः

**'भिषजः भैषज्यम्'** इत्ययं पाठ्यभागः **'श्रीराचन्द्रलघुकाव्यसङ्ग्रहः'** इति नामकात् कथाकाव्यग्रन्थात् स्वीकृतः। अस्य रचयिता महामहोपाध्याय पुल्लेल श्रीरामचन्द्रः। अस्य मातापितरौ मान्यौ सत्यवती-सत्यनारायणौ, जन्मप्रदेशः आन्ध्रप्रदेशे प्राच्यगोदावरी-मण्डलान्तर्गतः इन्दुपल्ली ग्रामः। अयं महान् शास्त्रज्ञः, पण्डितः, कविः, व्याख्याता, विमर्शकः अनुवादकश्च। अनेन शताधिकाः ग्रन्थाः उल्लिखिताः। अयं वेदान्तविशारद-महामहोपाध्यायादिभिः बिरुदैः सत्कृतः, बह्वीभिः संस्थाभिः बहुधा पुरस्कृतश्च। बहुशाश्त्रकोविदाः एते राष्ट्रपतिपुरस्कारग्रहीतारश्च। तथाच एते २०११तमे वत्सरे भारतसर्वकारेण पद्मश्री बिरुदेन सत्कृताः। प्रथमं द्वित्रासु संस्थासु अध्याप्य १९६० तमे वर्षे, उस्मानिया विद्यालयीय संस्कृतविभागे आचार्यपदवीम् अधिष्ठितवन्तः। बहुकालं संस्कृतपरिषदः निर्देशकत्वेन, (डैरेक्टर्) सुरभारतीसमित्याःसचिवत्वेन (कार्यदर्शी) संस्कृतवाङ्मयस्य सेवां विहितवन्तः। १९८७वर्षे पदवीतः विश्रान्ताः एते, २०१५ जून् २४ दिने स्वर्गस्थाः आसन्।

### पाठ्यभागपरिचयः

'भिषजः भैषज्यम्' इत्ययं गद्यपाठ्यभागः सन्देशात्मकः, वैद्यविद्यावृत्तौ प्रविविक्षूणां वैद्यविद्यार्थिनां मानवतायाः अभ्यसनाय उपकरिष्यति इति अयं पाठः उपनिबद्धः। कथाकथनं सुलभं सुगमं सुन्दरश्च।

## पाठ्यभागः

"अये! कोऽयं निर्बन्धः समयनियमो नाम समयनियम एव। साक्षात् परमेश्वरोऽपि वा आगच्छतु" इति सक्रोधं जगाद भिषक् वेङ्कटरावः। "आर्य! जानीम एव वयं भवतः कालनियमादिकम्। परन्तु एतादृशे आपत्समये अस्मासु अनुग्रहः कर्तव्यः" इति सानुनयम् आगतेष्वेकः ग्रामीणः प्रार्थयामास। वेङ्कटरावस्य हृदयं पुनः शिलासदृशं सान्त्ववाक्यैः अविचलितमेव आसीत्। "अरे! मूर्खाः! सर्वदापि स्वसुखचिन्तैव युष्माकम्। वैद्योऽपि मानव एव, तस्यापि विश्रान्तिसुखादिकम् आवश्यकमिति न चिन्तयति युष्मासु एकोऽपि। शीघ्रम् अपसरत" इति पुनः उच्चैः जगर्ज। किंकर्तव्यतामूढाः ते ग्रामीणाः अकारणकोपदारुणे भिषजः मुखे दीनाः दृष्टीः प्रसार्य, प्रतिगमनोन्मुखाः अभूवन्। अन्ततश्च तेषु एकः युवा किञ्चिद्धैर्यं समालम्ब्य अग्रतो गत्वा "आर्य! स्वसुखचिन्तेति अधिक्षिपसि भवान्। आकस्मिकयानप्रहारेण मूर्छितस्य मार्गे पतितस्य अज्ञातस्य बालस्य साहाय्यकरणमपि यदि 'स्वसुखम्', 'स्वार्थपरता' इत्युच्यते; अहो! करालः किल अयं कालः" इत्यवदत्।

इदं श्रुत्वा द्विगुणीकृतक्रोधः भिषक् - "अरे! मूर्ख! मम साहाय्यं याचितुमागतः मामेव अधिक्षिपसि। को वा न जानाति युष्माकं कपटोपायम्? अज्ञातो बाल इत्युक्त्वा विनैव शुल्कादिदानं चिकित्सां कारयितुं प्रयतते चेत् को वा मूर्खः विश्वसिष्यति? गम्यतां यथागतम्। नो चेद्भटैः निष्कासयिष्यामि" इति अतिपरुषं जगाद। "आर्य! न भवन्तं वञ्चितुम् अस्माकमभिलाषा, दास्याम एव यथाशक्ति यत्किञ्चित् चिकित्साशुल्कम्। बहिरागत्य पश्यतु तावद्भवानेतस्य बालकस्य मुखम्। तादृशस्य सुकुमारस्य एतादृशीमवस्थां दृष्ट्वापि वा भवतो हृदये करुणा जायेत" इति उद्गच्छन्तं कोपं नियम्य स युवा सविनयं प्रार्थयामास।

भिषक् विकटं विहस्य - "अहो भवदीयानां सुकुमारता। तदिदं यदुच्यते गार्दभ-किशोरसौकुमार्यमिति" इति वदन् राजभटस्थानं प्रति दूरभाषणीं नादयितुमारेभे। अत्रान्तरे

कश्चित् वृद्धः पुरः आगत्य ''अये! सर्वमपि संभाव्यत एव अस्मिन् करुणालेशविहीने। किमर्थमनेन सह वृथाकलहेन आयाप्यते कालः। क्षणे क्षणे किल परिक्षीयते बालस्य दशा। आगच्छत; अन्यत्र गमिष्यामः'' इति वदन् तं युवानमन्यांश्च अनयत्। वैद्यश्च अन्तर्विहस्य - ''गच्छत रे सारमेयाः न जाने किं वा छिन्नं भवति प्रतिदिनोपचीयमानजन-गणस्य भारतदेशस्य, यदि कश्चित् शुनकस्य शिशुः म्रियते'' इति यत्किञ्चिज्जल्पन् महता शब्देन कवाटं पिधाय अन्तरगच्छत्।

वेङ्कटरावः दरिद्राणां कुटुम्बे उदभूत्। पञ्चशवर्षदेशीय एव माता पञ्चत्वमगात्। तस्य पिता सर्वमप्यात्मनः प्रेम तस्मिन्नेकस्मिन् तनये केन्द्रीकृत्य जीविकामात्रपर्याप्तस्य क्षेत्रस्य साहाय्येन यथाकथञ्चित् कालं यापयति स्म। पुत्रस्य सुखमेव आत्मनः सुखं मन्यमानः सर्वथापि तस्य वर्धन एव तत्परः अभवत्। कुशाग्रधीः वेङ्कटरावोऽपि पाठशालायां सर्वासु कक्ष्यासु प्रथमतया उत्तीर्णतां लभमानः अन्ततः यथाकथञ्चित् वैद्यकलाशालायां स्थानमवाप्य एम्.बि.बि.एस् परीक्षायां सफलः अभवत्।

परन्तु कुटुम्बजीविकायाः एकावलम्बः क्षेत्रं सर्वमपि तस्य विद्यार्थं व्ययितमासीत्। तं क्षेत्रव्ययमपि सहस्रगुणादानासाधनभूतं मन्यमानः पिता तादृशस्य कालस्य प्रतीक्षां कुर्वन् मनोमोदकान्यास्वादयति स्म। कदा वा आत्मनः पुत्रः सहस्रशः वित्तं समुपार्जयेत्, कदा वा सर्वाण्यपि दुःखानि दूरीभवेयुः इत्येव तस्य निरन्तरं चिन्ता आसीत्। पठितवैद्यविद्यः, आकाररूपसम्पन्नो बुद्धिमानिति धिया वेङ्कटरावं कश्चिन्महाधनिकः आत्मनः जामातरम् अकार्षीत्। सुन्दराङ्ग्या जायया साकं प्रभूतं वित्तमप्यलभत वेङ्कटरावः। अनतिदीर्घकाल एव तस्य आर्जनं प्रतिमासं द्विसहस्रसंख्यामतिचक्राम। एवं पितुः सुब्बय्यशास्त्रिणः आशायाः पूर्वो भागः सफल एवासीत्। द्वितीयभागस्य पुनः साफल्यं न कदापि लेभे; येनासौ सर्वामेवात्मनः आशां विफलताममन्यत। प्रतिदिनमुपचीयमाने वेङ्कटरावस्य धने तत्संबद्धाः दुर्गुणा अपि द्विगुणेन वेगेन वर्धन्ते स्म।

**कीटबुद्धिर्मनुष्येषु देवताबुद्धिरात्मनि।**
**प्रामाण्यबुद्धिः स्तोत्रेषु नूतनायाः श्रियः फलम्।।**

इति न्यायेन बुद्धित्रयमपि तस्मिन् एकदैव समाविष्टमभवत्। प्रथमायाः कीटबुद्धेः पिता एव तत्प्रथमतया लक्ष्यतामगमत्। सुतेन अनादृतोऽप्ययम् उत्तमवंशप्रसूतायाः स्नुषायाः आदरवशेन, एकैकपौत्रे स्नेहवशेन च यथाकथंचित् तत्रैव कश्चित्कालं यापयामास। अन्ततश्चैकदा- यं कोऽपि याचकः इति कस्मैचित् मित्राय कथयतः पुत्रस्य वचः श्रुत्वा विमाननाग्निना दह्यमानचेताः दूरतः स्वग्रामे यथाकथंचित् जीवितावशेषं यापयितुं जगाम।

विवाहो नाम वणिग्व्यवहार एवेति विश्वासः वेङ्कटरावस्य। तस्य मते धनमेव सर्वप्रधानम्, सर्वं खल्विदं वित्तम् इति चिन्तयन् सर्वमपि जगत्कनकमयमपश्यत्। एतादृशी चिन्ता कदा वा उद्भूता तस्य मानसे इति न निश्चयेन वक्तुं शक्यते। प्रायः वैद्यकलाशालायां धनिकानन्यान् सहाध्यायिनः पश्यन् आत्मानं निर्धनस्य पुत्रं जानन् असौ क्रमशः पितरि द्वेषम्, धने चासक्तिं सममेव वर्धयामास मानसे। ऐश्वर्यवत्या कन्यया विवाहे च इयं धनासक्तिरेव प्रबलकारणम्। तस्य चायं विश्वासः यत्- सकलगुणसम्पन्नायाः अपि धनिककुमार्याः निर्धनस्य पुत्रे अकृत्रिमं प्रेम असम्भाव्यमेवेति। अत एवायम् अन्वर्थनामधेयवत्याः भर्यायाः सुशीलायाः सहजं प्रेम अतथ्याभिनयं मन्यमानः स्वयं तस्यामादितः प्रभृति नातीव प्रेमवान् बभूव। वस्तुतस्तु तस्य सहजप्रेम्णः एकैकपात्रं कुमारः सुरेश एव तयोः दाम्पत्यरज्जोः दृढः ग्रन्थिरासीत् येन सा बहोः कालात् पूर्वमेव नासीर्यत।

वेङ्कटरावस्य इयं कठोरा प्रवृत्तिः एवं स्वकुटुम्बविषये एव परिमिता आसीत्। लोकेन पुनरसौ करुणामयान्तरङ्गः, सर्वविधचिकित्साविशारदः, परोपकारदीक्षितः भिषग्वरेण्यः अदृश्यत। एवं सफलोऽस्य सौजन्याभिनयः महत् यशः, प्रभूततमं वित्तं च प्रतिदिवसं वर्धयामास। क्रमेण च पूर्यमाणायां धनाभिलाषायाम् अधिकारवाञ्छाप्यस्य हृदये पदं न्यदधात्। क्रमशश्च सा दृढतरा अभवत्।

उत्तमाधिकारविहीनम् ऐश्वर्यमपि निष्फलमिति मेने वेङ्कटरावः। समुपार्जितप्रभूतवित्तस्य लोकप्रियस्य चैतादृशस्य कियदिदं यदधिकारसम्पादनं नाम। विनैव श्रमेण वेङ्कटरावः द्विवारं शासनसभायाः सभ्यतामलभत। परं तु तेन तावतैव सन्तेष्टव्यमासीत्, यतः बहुधा प्रयत्यापि स मन्त्रित्वादिकं प्राप्तुं नाशकत्। स्वार्थचिन्तयापि वा एतावत्पर्यन्तं कृतं लोकाराधनं व्यर्थं दृष्ट्वा वेङ्कटरावः भग्नमनोरथः अभवत्।

अयं चाशाभङ्गः क्रमेण तस्य हृदयान्तर्निगूढं सहजं द्वेषभावं अहंकारं च उद्बोधयामास। अन्ते च तृतीयवारं शासनसभासभ्यत्वस्यापि अलाभः तस्मिन् यत्किञ्चिदवशिष्टं कपटसौजन्यं समूलमुन्मूलयामास। पितरि कृतप्रारम्भा कीटबुद्धिः अद्य सर्वेषु जनेषु विस्तारिता अभवत्। आत्मनः पराजयस्य एते एव कारणमिति सामान्यजनेषु तस्य महती जुगुप्सा अजायत। तादृशसौजन्यशीलस्य एतादृशं पारुष्यं दृष्ट्वा सर्वेऽपि विस्मयाविष्टा अभवन्। को वा जानाति कीदृशोऽस्य सहजः स्वभावः इति?

तस्मिन् दिवसे भिषजः वेङ्कटरावस्य मानसं किञ्चित् व्याकुलमिवासीत्। इदं तस्यातीव दुःसहं यत् सप्ताहात् पूर्वमेव प्रभुत्वचिकित्सालये नियोगेनागता आत्मनः सहाध्यायिनी भिषगङ्गना (Lady Doctor) अद्यावधि आत्मानं द्रष्टुं नागतेति। स्वयमेव तां द्रष्टुं जिगमिषोरपि तस्य पादौ पुरावृत्तं कंचन वृत्तान्तं स्मारं स्मारं पुरः न प्रावर्तेताम्।

पुरा एकदा कलाशालायां शरीरावयवबोधकक्ष्यायाम् उपन्यासकस्य उपन्यासमश्रुत्वैव मुहुर्मुहुः आत्मानं पश्यन्तं तं वीक्ष्य मञ्जुहासिनी तस्य मूढत्वं प्रति किञ्चित् स्मेरवदना आसीत्। तच्च प्रेमचिह्नं मत्वा अयं कलाशालायाः बहिः किञ्चित् विकृतं विकृतं चेष्टितुमारेभे येन पादुकाचपेटिकावर्जं सर्वैः अन्यैः सत्कारैः सत्कृतोऽभवत्। तदा निर्धनत्वात् तथा करणेऽपि, अद्य सञ्चितप्रभूतवित्तं सत्करिष्यत्येव सा स्नेहेन अथवा प्रेम्णेति तस्य महती आशा आसीत्। एवं मानसि हर्म्याणि निर्ममाणेऽसौ तेषु असमयोपसृतेषु ग्रामीणेषु तथा क्रूरता प्रववृते।

अत्रान्तरे तेषां गमनानन्तरम् अर्धघण्टायाः पूर्वमेव दूरभाषिणी ननाद। भिषक् वेङ्कटरावः सावज्ञमिव श्रावणीं श्रवसि निधाय "कः कोऽत्र भोः"? इत्यपृच्छत्। हन्त! तेन चिरात् निरीक्षितः स्वरः शीघ्रमेव प्रभुत्वचिकित्सालयमागन्तुं प्रार्थयन् अश्रूयत। अतिक्लिष्टः किल कश्चित् यादृच्छिकः प्रहारः विचिकित्सितव्यः यत्र वेङ्कटरावस्य साहाय्यमपेक्ष्यते। इयमचिन्तितोपनतम् अवसरं दृष्ट्वा वेङ्कटरावस्य निरवधिः प्रमोदः अभवत्। शीघ्रमेव यथोपस्थितं वस्त्राणि धृत्वा बहिरागत्य सारथिम् उच्चैः आजुहाव।

तदैव कुतोऽप्यागच्छन् सारथिः अवदत् "आर्य! पाठशालातः कुमारं सुरेशमानेतुं गच्छन्नहं मार्गे स्नेहयानस्य (Car) शिथिलबन्धां स्थापनीं (Brake) दृढीकारयितुं स्वास्थ्यागारम् (Repairing house) अगच्छम्। तत्र किञ्चित् विलम्बः आसीत्। ततश्च पाठशालां गतोऽहं तत्र कुमारं नापश्यम्। प्रायः स पादचारेण........" इति कथयत एव तस्य वचनमन्तरा आक्षिप्य वेङ्कटरावः - "भवतु, भवतु तेनागतेन भवितव्यम्। अद्य अस्माभिः शीघ्रमेव प्रभुत्वचिकित्सालयं प्रति गन्तव्यम्। कष्टायां किल कस्यांचन चिकित्सायां मम साहाय्यमपेक्ष्यते" इति वदन्, प्रत्युत्तरमप्रतीक्षमाणः शीघ्रमेव स्नेहेन साटोपमुपविवेश। पुरा कदाप्यदृष्टां तां परचिकित्साश्रद्धामस्य दृष्ट्वा विस्मयाविष्टमनाः सारथिः शीघ्रमेव तं चिकित्सालयमनयत्। चिकित्सालयप्राङ्गणं प्रविष्ट एव वेङ्कटरावः नेत्राभ्यां मञ्जुहासिनीम् अन्विष्यन्, अर्धघण्टायाः पूर्वमेव स्वसमीपमागतान् ग्रामीणान्, तेषां च निकटे शयितस्य स्वपुत्रस्य श्वासं परीक्ष्य अधरविस्फाटितकेन नैराश्यं सूचयन्तीं मञ्जुहासिनीं च वीक्ष्य व्रीडादुःखविहतमनाः मूर्छितोऽभवत्।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. भिषजो भैषज्यम् इति पाठ्यभागस्य सारांशं संक्षेपेण लिखत।

२. वेङ्कटरावस्य स्वभावं संग्रहेन लिखत।

### २. लघुसमाधानप्रश्नाः

१. वेङ्कटरावस्य पिता कः?

२. प्रभुत्वचिकित्सालये नियोगेनागता भिषगङ्गना का?

३. मञ्जुहासिनी का?

### ३. एकपदसमाधानप्रश्नाः

१. भिषजः भैषज्यम् इति पाठ्यांशः केन विरचितः?

२. वेङ्कटरावस्य पुत्रः कः?

३. वेङ्कटरावस्य पत्नी का?

### ४. सन्दर्भवाक्यानि

१. वैद्योऽपि मानव एव।

२. क्षणे क्षणे किल परिक्षीयते बालस्य दशा।

३. विवाहो नाम वणिग्व्यवहार एव।

## व्याकरणांशाः

### ५. सन्धयः

१. सर्वादा + अपि = सर्वदापि - सवर्णदीर्घसन्धिः

२. सर्वथा + अपि = सर्वथापि - सवर्णदीर्घसन्धिः

| | | | |
|---|---|---|---|
| ३. अत्र + अन्तरे | = अत्रान्तरे | - सवर्णदीर्घसन्धिः |
| ४. विना + एव | = विनैव | - वृद्धिसन्धिः |
| ५. इति + उच्यते | = इत्युच्यते | - यणादेशसन्धिः |
| ६. सर्वाणि + अपि | = सर्वाण्यपि | - यणादेशसन्धिः |
| ७. मुहुः + मुहुः | = मुहुर्मुहुः | - विसर्गसन्धिः |
| ८. वैद्यः + अपि | = वैद्योऽपि | - विसर्गसन्धिः |
| ९. यत् + उच्यते | = यदुच्यते | - जश्त्वसन्धिः |
| १०. सर्वे + अपि | = सर्वेऽपि | - पूर्वरूपसन्धिः |

## ६. समासाः

| | | |
|---|---|---|
| १. **स्वग्रामे** | - स्वस्य ग्रामे | - षष्ठीतत्पुरुषसमासः |
| २. **अकृत्रिमम्** | - न कृत्रिमम् | - नञ् तत्पुरुषसमासः |
| ३. **अलाभः** | - न लाभः | - नञ् तत्पुरुषसमासः |
| ४. **अकरुण** | - न करुण | - नञ् तत्पुरुषसमासः |
| ५. **दम्पती** | - जाया च पतिः च | - द्वन्द्वसमासः |
| ६. **यथाशक्ति** | - शक्तिम् अनतिक्रम्य | - अव्ययीभावसमासः |
| ७. **भग्नमनोरथः** | - भग्नः मनोरथः यस्य सः | - बहुव्रीहिसमासः |

# ६ अप्पय्यदीक्षितेन्द्रः

उषाराणी सङ्का

## परिचयः

सङ्का उषाराणी भाग्यनगरे जन्म लेभे। अध्ययनस्य अधिकांशः तत्रैवाभवत्। बाल्यादेव देववाण्याम् अभिरुचेः कारणेन स्नातकोपाधिम्, स्नातकोत्तरोपाधिं च उस्मानिया-विश्वविद्यालयात् सम्प्राप्तवती। ततश्च तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे व्याकरणाध्ययनं कृत्वा, सङ्गणकयन्त्रीय-भाषाशास्त्रक्षेत्रे धातुकारकाकाङ्क्षायाः अध्ययनं विषयत्वेन स्वीकृत्य शोधं निरुह्य विद्यावारिध्युपाधिं प्राप्तवती।

### पाठ्यभागपरिचयः

अप्पय्यदीक्षितः महासंस्कृतविद्वान्, कविः शिवोपासकः च आसीत्। तेषां कुटुम्बः एव पण्डितानां आकरोऽस्ति। पितुः एव सकलशास्त्राणि अधीतवान्। नैकेषु विषयेषु बहून् ग्रन्थान् विरचितवान्। तस्य जीवनं सर्वम् अद्भुतघटनाभरितमस्ति। तेन रचितानि स्तोत्रादीनि अद्यापि जनसामान्ये प्रचलितानि सन्ति।

## पाठ्यभागः

कदाचित् कस्यचित् महापण्डितस्य शिवभक्तस्य मनसि काचित् शङ्का जाता। 'किम् अहं वस्तुतः योग्यः भक्तः अस्मि, उत केवलं अयमाडम्बर एव?' इति। सः तदर्थं काञ्चित् परीक्षां स्वस्य उपरि विहितवान्। उन्मत्ततास्थित्यां भवति मनुष्यस्य वास्तविकतायाः ज्ञानम्। 'अहम् उन्मत्ततां गमिष्यामि, तस्यां स्थितौ किं वदामीति

ज्ञास्यामि।' इति विचिन्तितवान्। स्वयं तस्य वैद्यज्ञानमासीत्। अतः सः स्वशिष्यान् आहूय उक्तवान्- अहं दत्तूरफलानि खादिष्यामि। तदानीं यदहं प्रलपामि, तत्सर्वं यथातथम् अशेषं लिखन्तु। अन्ते मह्यम् एतत् प्रतीकारकम् औषधं प्रयच्छन्तु। इति। ते अङ्गीकृतवन्तः। सः दत्तूरफलानि खादितवान्। तस्य मतिभ्रमः जातः। तदा बहुप्रलापं कृतवान्। सः प्रजल्पः एव पञ्चाशत्पद्यानां समाहारः अभवत्। सः मतिभ्रान्तेः प्रतिकारकम् अगदं स्वीकृत्य, स्वस्थो भूत्वा सर्वं पठितवान्। तेषु पद्येषु वेदशास्त्रादिप्रमाणैः शिवतत्त्वं निरूपितमस्ति। सा एव पद्यमाला उन्मत्तपञ्चाशत् इति, अथवा आत्मार्पणस्तुतिरिति नाम्ना विख्याता। स्वस्मिन् निसर्गशिवभक्तिं विज्ञाय स महानन्दभरितः।

स एव षोडशतमशताब्दे नटराजानुग्रहेण जातः शिवांशसम्भूतः अप्पय्यदीक्षितेन्द्रः। अप्प, अप्पै, अप्पय, अप्पय्य इति वा तस्य गौरवनाम वर्तते। तस्य बाल्यकाले तु 'विनायक सुब्रह्मण्य' इति नाम अभवत्। अस्य महापुरुषस्य जन्म तमिलनाडुप्रदेशे विरिञ्चिपुरे मातुलग्रामे अभवत्। उत्तर-आर्कोटजिल्लायाम् आरणिसमीपे अडयप्पलमिति अग्रहारे पितृपितामहानां परम्परायाः वासस्थानं वर्तते।

अस्य जन्मविषये पूर्वसूचनारूपेण शिवरहस्याख्ये ग्रन्थे एवमुक्तम्- दीक्षितोऽपि भवेत् कश्चिन्मदंशो भूसुरोऽम्बिके, भासुराचारनिरतः शैवछन्दोगवंशजः इति।

अयं चतुःपञ्चाशदुत्तरपञ्चदशतमे (1554) वर्षे, प्रमातीचवर्षे, आषाढमासे, कृष्णपक्षे, प्रथमातिथौ, उत्तरप्रोष्ठपदनक्षत्रे कन्यालग्ने जातः। तस्य वंशः प्रख्यातपण्डितैः प्रपूर्णः च। अस्य पिता रङ्गराजाध्वरिः असमानविद्वान्, महावैदुष्यपूर्णः चासीत्। पितामहः च आच्चानदीक्षितः, वक्षस्थलाचार्य इति बिरुदाङ्कितः कृष्णदेवरायस्य आस्थानपण्डितः आसीत्। अनयोरेव अप्पय्यः समस्तशात्राणि अधिगतवान्। अप्पय्यस्य एकः सहोदरः अच्चन इति आसीत्। नीलकण्ठदीक्षितः इति प्रसिद्धः संस्कृतपण्डितः तस्य भ्रातुः पौत्रः आसीत्।

एषः आदिशङ्कराचार्य इव प्रतिभावान् बहुमुखप्रज्ञाशाली च। न केवलं विद्वान्, दार्शनिकः, कविः, भक्तः, अपि तु परमवैदिकः कर्ममार्गी, महावेदान्ती, वैयाकरणः, मीमांसकः, तन्त्रशास्त्रज्ञः, आलङ्कारिकः, तार्किकः च आसीत्। अप्पय्यः प्रादेशिकतायाः वैष्णवः, कुटुम्बसंस्कारात् पुनः अद्वैतवेदान्ती, परं तस्य चतुर्मतविज्ञानम् आश्चर्यजनकम् आसीत्। सः बाल्ये एव गुरोः नृसिंहरामस्वामिनः चतुर्दशविद्याः अधीतवान्।

चोलराजस्य आस्थाने कश्चन सभापण्डितः आसीत्। तस्य नाम रत्नखेटश्रीनिवास इति। सः अप्पय्यस्य कीर्तिं, पाण्डित्यप्रकर्षतां च श्रुत्वा यथाकथञ्चित् अप्पय्यः जेतव्यः, स्वपादयोः पातनीयः इति तस्य अभिलाषा जाता। सः तदर्थं वादपटुतायै काञ्चीपुरं गत्वा कामाक्षीं प्रार्थयत्। सा देवी प्रकटिता भूत्वा अवदच्च- अप्पय्यः असाधारणः। वादे जेतुमशक्तः। अतः तस्मै स्वकन्याम् अर्पयतु। तदा त्वं तस्य श्वशुरः भविष्यसि। तदा सः तव पादस्पर्शं करिष्यति। तेन तव कामनापूर्तिः भविष्यति। इति। तदानीमेव भगवान् शिवः अप्पय्यस्य स्वप्ने दृष्टः, 'काञ्चीं गच्छतु' इति समादिशत्। अप्पय्यः तथाचरितवान्। तदा श्रीनिवासः तस्य गृहमगच्छत्। अप्पय्यः तम् अर्घ्यपाद्यादिभिः सत्कृतवान्। श्रीनिवासः सन्तुष्टः सन् तस्मै स्वदुहितरं मङ्गलाम्बिकां समर्पयत्। एवमप्पय्यः गृहस्थः सञ्जातः। तस्य मरकतवल्ली, मङ्गलाम्बेति द्वे पुत्र्यौ, उमामहेश्वरः, नीलकण्ठः, चन्द्रावतंसः इति त्रयः पुत्राः चासन्।

बहवः विश्रुताः जनाः तस्य समीपमागत्य विद्यामधिगच्छन्ति स्म। भट्टोजिदीक्षितः अप्पय्यस्य समीपं मीमांसां, वेदान्तं च अध्येतुम् आगतः। स अस्य विख्यातिं दूरतः श्रुत्वा आगच्छत्। प्रथमवारं अप्पय्यं पश्यति स्म। महाराजानां संस्थानेषु यस्य गमनागमनं भवति, महाधिपतयः यं नमन्ति, यस्य सहस्राधिकाः शिष्याः सन्ति, यः अनेकग्रन्थानां प्रणेता, स अवश्यं महाधनवान्, आटोपयुक्तः च भवेदिति चिन्तितवान्। किन्तु अप्पय्यः धूलियुक्तैः वस्त्रैः, अतिसामान्ये कुटीरे, अकिञ्चन इव तस्य दृष्टिंगतः। सः अत्यन्तमाश्चर्यचकितः अभवत्। गुरुप्रशंसां कुर्वन् स एवं लिखति-

**अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।**
**यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी।।** इति।

अप्पय्यः १०४ ग्रन्थान् विरचितवान्। अप्पय्येन रचिताः ग्रन्थाः वेदान्त-व्याकरणालङ्कार-स्तोत्रादि-अनेकानेक-विषयसम्बद्धाः विराजन्ते। वेदान्तग्रन्थेषु-सिद्धान्तलेशसङ्ग्रहः, परिमलव्याख्या च प्रसिद्धिं गतौ। शिवभक्तिविषये शिवकर्णामृतं, शिवार्चनचन्द्रिकेति प्रसिद्धे। शिवार्कमणिदीपकेति शिवाद्वैतपरकग्रन्थः। अस्य साहित्यविदग्धतायाः उदाहरणे कुवलयानन्दः, चित्रमीमांसेति च। स्तोत्रकाव्येषु दुर्गाचन्द्रकलास्तुत्यां शाक्तेयवादसूक्ष्मतां, वरदराजस्तवे वैष्णवमतसौन्दर्यं, मार्गसहाय-स्तवादिषु शिवस्तोत्रेषु च शैवसिद्धान्तमाधुर्यं, आदित्यस्तोत्रे तद्व्याख्यायां च सौरमततत्त्वं, वैदिकैः प्रमाणैः पौराणिकाधारैः च प्रतिपादितवान्। व्याख्याग्रन्थेषु न्यायरक्षामणिः, यादवाभ्युदयं चेति विख्याताः। पाणिनीयतन्त्रवादनक्षत्रमालेति तदीयः व्याकरणग्रन्थः।

अस्य प्रज्ञां दृष्ट्वा बहवः राजानः तञ्जावूरु-तिरुपति-कालहस्तितः तम् आह्वयन्ति स्म। अस्य अल्पे एव वयसि पितुः रङ्गराजाध्वरेः मृत्योः पश्चात् वेल्लूरुराजा चिनबोमनायकः तम् आह्वयत्। बहून् पण्डितान् अप्पय्यं निमन्त्रयितुं तत्समीपं प्रेषितवान्। अप्पय्यः आगमनाय अङ्गीकृत्य तत्र अगच्छत्।' सर्वतोभद्रम् इति अप्पय्याय गृहं निर्मीय दत्तवान् राजा। अस्य पाण्डित्यकारणेन राजा अमुम् आदरेण पश्यति स्म। तद्दृष्ट्वा ताताचार्यः इति कश्चन आस्थानपण्डितः ईर्ष्याग्रस्तः जातः। स अप्पय्यं हन्तुं बहुधा प्रयतितवान्।

अप्पय्यः उच्चकोटिकः भगवदुपासकः। सः सहजभक्तिप्रपूर्णः सिद्धपुरुषश्च। सदा मन्दिरं गत्वा भगवतः चरणामृतसेवनं करोति स्म।

प्रधानपदव्यां स्थितः कोऽपि रोगग्रस्तः न भवेदिति शास्त्रनियमोऽस्ति। किन्तु अप्पय्यः मूर्छाव्याधिना पीडितः आसीत्। अतः सः अयुक्तः इति केनचिद् उक्तः राजा । सः तत्र सत्यासत्यनिर्धारणाय तं मूर्छास्थित्यां स्वयं द्रष्टुमिच्छति स्म । यदा अप्पय्यः मूर्छां प्राप्तवान्, तदा राजा आहूतः। यावत् सः अप्पय्यस्य मन्दिरान्तः प्रविशति, तावत् स्वस्थः अप्पय्यः तं हासमुखः सन् आहूतवान्। राजा परमाश्चर्यचकितः अभवत्। क्वास्ति ते मूर्छ इति अपृच्छत्। भवान् आगच्छतीति रोगम् अहं तत्र न्यस्तवान्, पश्यतु इति अप्पय्यः नृपतिं स्वोत्तरीयं प्रादर्शयत्। उत्तरीयं मूर्छाव्याधिग्रस्त इव कम्पते स्म। राजा सम्भ्रान्तः सन् तं प्राणमत्। मूर्छाव्याधिकारणेन अप्पय्यस्य अनुष्ठानेषु, अध्ययनाध्यापनादिषु कार्येषु, ग्रन्थरचनाकार्येषु वा कदापि बाधा नापतति स्म। कर्मगतिम् उपासनया अपाकर्तुं समर्थः सन्नपि अनुभुज्य एव तस्य क्षयं करोति स्म। अनेन कर्म केनापि अनुभोक्तव्या एव इति स महानुभावः न्यरूपयत्।

दीक्षितो नाम यज्ञान् आचरितवानिति अर्थः। सः सोमयाग-वाजपेयादीन् चतुरधिकशतान् श्रौतयज्ञान् अकरोत्। विश्वजिद्यागमपि इष्टवान्। सः कदाचित् यज्ञमाचरति स्म। राजा चिनबोमनायकः तद्गृहमागत्य तस्मै नानाविधवस्त्राणि, आभरणानि च समर्पितवान्। तान् सर्वान् अप्पय्यः अग्नौ प्राक्षिपत्। मया दत्तानि महार्घाणि वस्तूनि अग्नौ क्षिप्तवानयमिति राजा ईषत्क्रुद्धः जातः। तदा अप्पय्यः तं ज्वालासु अग्निदेवं प्रादर्शयत्। दिव्यरूपः वह्निदेवः तान्येव नृपेण अर्पितानि वस्त्राणि आभूषणानि च धृत्वा आविरभूत्। एतत् दृष्ट्वा नृपः परमसन्तुष्टः।

परमशिवभक्तः सन् अपि सः विष्णुनिन्दां कदापि न करोति स्म। अधिकतया शैवमततत्त्वस्य प्रचाराय प्रसाराय एव तस्य जन्माभवदिति विदुषां मतम्। तस्य शिवार्कमणिदीपिकेति ग्रन्थस्य समाप्तौ राजा तं कनकाभिषेकेण सत्कृतवान्। तत् सर्वं हिरण्यम् उपयुज्य अप्पय्यः स्वग्रामे शिवमन्दिरं निर्मापितवान्। तपोवनमिव शान्ततया

कालकण्ठेश्वरालयः अधुनापि अडयप्पलं ग्रामे अस्ति, यत्र अप्पय्यचरित्रं, विशेषाश्च शिलालेखेषु दृश्यन्ते।

वस्तुतः अप्पय्यः तमिलदेशीयः, तथापि आन्ध्रप्रादेशिकैः, भाषया, संस्कृत्या, आचारैः च सह तस्य सत्सम्बन्धाः आसन्। स आनध्रभाषीयः न, तथापि आन्ध्रप्रयोगान्, लोकोक्तीः च अनेकधा प्रयुनक्ति। आन्ध्रभाषाम् एवं प्रशंसति-

**आन्ध्रत्वमान्ध्रभाषा च प्राभाकरपरिश्रमः।**
**तत्रापि याजुषीशाखा नाल्पस्य तपसः फलम्।।** इति।

विवाहितः दीक्षितः प्रवृत्तिमार्गे आसीत्, तथापि तस्य स्वान्तं निवृत्तिमार्गे एवासीत्। प्रतिदिनं मन्दिरं गच्छन् अन्तिमकालं चिदम्बरनटराजस्य सन्निधौ यापितवान्। सः षड्विंशत्युत्तरषोडशशततमे (1626) सामान्यशके, आत्मनः द्विसप्ततितमे (72) वयसि स्वकीयैः समस्तकार्यैः सन्तुष्टः, संसारबन्धनैः विमुक्तः सन् शिवैक्यं प्राप्तवान्। तस्यान्तिमे दिने सः कैश्चित् भक्तैः देवालयस्य पञ्चाक्षरसोपानेषु लीलया दृष्टः। सपदि तिरोभूय नटराजस्य प्रतिमायां विलीनः। तस्मिन्नेव क्षणे अप्पय्यः स्वगृहे प्राणैः विगतः इति वार्ता आगता। अत एव तस्य अलौकिकानि कार्याणि, असाधारणप्रतिभां च दृष्ट्वा अप्पय्यः साक्षात् परमशिवस्य अवतारः इति नैके विज्ञाः मन्यन्ते स्म। एवंविधस्य महापुरुषस्य चरित्रं ज्ञात्वा वयं धन्यतां गच्छामः।।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. अप्पय्यदीक्षितस्य जीवितचरितं संक्षेपेण लिखत ?

२. अप्पय्यदीक्षितेन्द्र इति पाठ्यभागसारांशं संग्रहेण विवृणुत ?

## २. लघुसमाधानप्रश्नाः

१. अप्पय्यदीक्षितः कुत्र जन्म लेभे ?

२. रत्नखेटिश्रीनिवासस्य अभिलाषा का ?

३. अप्पय्यदीक्षितः आन्ध्रभाषां कथं प्रशशंस ?

## ३. एकपदसमाधानप्रश्नाः

१. अप्पय्यदीक्षित इति पाठ्यांशस्य रचयित्री का ?

२. अप्पय्यदीक्षितः कस्य पुत्रः ?

३. अप्पय्यदीक्षितः चतुर्दशविद्याः कस्मात् अधीतवान् ?

## ४. सन्दर्भवाक्यानि

१. अप्पय्यः असाधारणः वादे जेतुमशक्तः।

२. राजा तं कनकाभिषेकेण सत्कृतवान्।

३. अप्पय्यः साक्षात् परमशिवस्य अवतारः।

### विशेषतो ज्ञेयाः

## ५. कठिनशब्दार्थाः

| | |
|---|---|
| १. प्रतीकारकम् | - विरुद्धप्रभावकारकम् |
| २. भासुराचारनिरतः | - सुष्ठु आचारान् पालयतीति |
| ३. प्रादेशिकतायाः | - प्रदेशस्य प्रभावात् |
| ४. भगवदुपासकः | - भक्तः |
| ५. सत्यासत्यनिर्धारणाय | - सत्यम् असत्यं वा इति ज्ञातुं |
| ६. प्रवृत्तिमार्गे | - लौकिकजीवने |

## ६. पर्यायशब्दाः

१. आडम्बरः - बाह्यप्रदर्शनम्, डाम्बिकता, पटाटोपः

२. उन्मत्तता - चित्तभ्रान्तिः, मतिभ्रमः, उन्मादः, बुद्धिभ्रंशः, व्यामोहः

## व्याकरणांशाः

## ७. सन्धयः

| | | |
|---|---|---|
| १. नटराज+अनुग्रहेण | = नटराजानुग्रहेण | - सवर्णदीर्घसन्धिः |
| २. चरण+अमृतसेवनम् | = चरणामृतसेवनम् | - सवर्णदीर्घसन्धिः |
| ३. दीक्षितः+अपि | = दीक्षितोऽपि | - विसर्गसन्धिः |
| ४. भूसुरः+अम्बिके | = भूसुरोऽम्बिके | - विसर्गसन्धिः |
| ५. कश्चित्+मदंशः | = कश्चिन्मदंशः | - अनुनासिकसन्धिः |
| ६. अनयोः+एव | = अनयोरेव | - रेफादेशसन्धिः |
| ७. कालकण्ठ+ईश्वरालयः | = कालकण्ठेश्वरालयः | - गुणसन्धिः |
| ८. वदामि+इति | = वदामीति | - सवर्णदीर्घसन्धिः |
| ९. परम+आश्चर्यचकितः | = परमाश्चर्यचकितः | - सवर्णदीर्घसन्धिः |
| १०. पुनः+निर्माणम् | = पुनर्निर्माणम् | - विसर्गसन्धिः |

## ८. समासाः

| | | |
|---|---|---|
| १. **महानन्दभरितः** | - महानन्देन भरितः | - तृतीयातत्पुरुषसमासः |
| २. **मातुलग्रामे** | - मातुलस्य ग्रामे | - षष्ठीतत्पुरुषसमासः |
| ३. **अर्घ्यपाद्यादिभिः** | - अर्घ्यं च पाद्यं च तदादयः, तैः | - द्वन्द्वसमासः |
| ४. **अकिञ्चनः** | - न किञ्चनः | - नञ् तत्पुरुषसमासः |

| | | |
|---|---|---|
| ५. **पापपरिहाराय** | - पापस्य परिहाराय | - षष्ठीतत्पुरुषसमासः |
| ६. **अशेषम्** | - न शेषम् | - नञ् तत्पुरुषसमासः |
| ७. **दत्तूरफलानि** | - दत्तूर इति फलम्, तानि | - सं.पूर्व.कर्मधारयः |
| ८. **स्वपादयोः** | - स्वस्य पादाः स्वपादाः, तयोः | - षष्ठीतत्पुरुषसमासः |
| ९. **स्वकन्याम्** | - स्वस्य कन्या, ताम् | - षष्ठीतत्पुरुषसमासः |
| १०. **कामनापूर्तिः** | - कामनायाः पूर्तिः | - षष्ठीतत्पुरुषसमासः |
| ११. **स्वदुहितरम्** | - स्वस्य दुहिता, स्वदुहिता,ताम् | - षष्ठीतत्पुरुषसमासः |
| १२. **गुरुप्रशंसाम्** | - गुरोः प्रशंसा-गुरुप्रशंसा,ताम् | - षष्ठीतत्पुरुषसमासः |

# उपवाचकम्

## १. कर्णभारम्

- महाकवि भासः

## २. वज्रं वज्रेण भिद्यते

- पण्डित ओगेटि परीक्षित् शर्मा

## ३. मूर्खराजकम्

- पूजालालः

# उपवाचकम्

# १ कर्णभारम्

महाकवि भासः

## परिचयः

संस्कृतनाटककर्तृषु अग्रगण्योऽयं भासमहाकविः कालिदासादपि अर्वाचीनः। अनेन रचितानि त्रयोदश नाटकानि भासनाटकचक्रनाम्ना लोके प्रसिद्धानि। रामायण-महाभारत-हरिवंशादीन् आधारीकृत्य अनेन नाटकानि विरचितानि। तानि च-

**१. प्रतिमानाटकम्** **२. अभिषेकनाटकम्** **३. मध्यमव्यायोगः**
**४. दूतवाक्यम्** **५. दूतघटोत्कचम्** **६. कर्णभारम्**
**७. ऊरुभङ्गः** **८. पञ्चरात्रम्** **९. बालचरितम्**
**१०. स्वप्नवासवदत्तम्** **११. प्रतिज्ञायौगन्धरायणम्** **१२. अविमारकम्**
**१३. चारुदत्तम् च।**

नाटकान्येतानि टि.गणपतिशास्त्रिमहोदयेन १९०९ वर्षे केरलप्रान्ते लब्धानि। तेनैव शास्त्रिमहोदयेन भासनाटकानि प्रकाशं नीतानि। भासः असमानप्रतिभावानिति सूरिभिः कीर्त्यते। अस्य रचनारीतिः रम्या।

### पाठ्यभागपरिचयः

नाटकमिदं महाभारतमाधारीकृत्य विरचितम्। नाटकेऽस्मिन् युद्धरंगं प्रति गमन-समये कर्णेन अनुभूतः हृदयपरितापः, स्वरथसारथिं शल्यराजं प्रति परशुरामेण कृतशाप-वृत्तान्तकथनम्, शक्रेण कवचकुण्डलयाचनम्, तस्मै कवचकुण्डलप्रदानम्, शक्रप्रेषित-विमलानामकशक्त्यायुधग्रहणमित्यादिविषया उपनिबद्धाः।

## पाठ्यभागः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

**सूत्रधारः-**

**नरमृगपतिवर्ष्मालोकनभ्रान्तनारी**
**नरदनुजसुपर्वव्रातपातालोकः।**
**करजकुलिशपाली भिन्नदैत्येन्द्रवक्षाः**
**सुररिपुबलहन्ता श्रीधरोऽस्तु श्रिये वः॥**

(नेपथ्ये) भो भो! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वराय। भवतु विज्ञातम्।

**सूत्रधारः-**

**सङ्ग्रामे तुमुले जाते कर्णाय कलिताञ्जलिः।**
**निवेदयति सम्भ्रान्तो भृत्यो दुर्योधनाज्ञया॥**

(निष्क्रान्तः)

॥ प्रस्तावना ॥

(ततः प्रविशति भटः)

**भटः-** भो भो! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वराय युद्धकाल उपस्थित इति।

**करितुरगरथस्थैः पार्थकेतोः पुरस्तात्**
**मुदितनृपतिसिंहैः सिंहनादः कृतोऽद्य।**
**त्वरितमरिनिनादैः दुस्सहालोकवीरः**
**समरमधिगतार्थः प्रस्थितो नागकेतुः॥**

(परिक्रम्य विलोक्य) अये अयमङ्गराजः समरपरिच्छदपरिवृतः शल्यराजेन सह स्वभवनान्निष्क्रम्य इत एवाभिवर्धते। भोः किं नु खलु युद्धोत्सवप्रमुखस्य दृष्टपराक्रमस्य अभूतपूर्वो हृदयपरितापः।

एष हि-

**अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः**
**शौर्ये च सम्प्रति सशोकमुपैति धीमान्।**
**प्राप्ते निदाघसमये घनराशिरुद्धः**
**सूर्यस्स्वभावरुचिमानिव भाति कर्णः।।**

यावदपसर्पामि। (निष्क्रान्तः)

(ततः प्रविशति यथानिर्दिष्टः कर्णः शल्यश्च)

**कर्णः-** **मतावन्मम शरमार्गलक्ष्यभूताः**
**सम्प्राप्ताः क्षितिपतयः सजीवशेषाः।**
**कर्तव्यं रणशिरसि प्रियं कुरूणां**
**द्रष्टव्यो यदि स भवेद्धनञ्जयो मे।।**

शल्यराज! यत्रासौ अर्जुनस्तत्रैव चोद्यतां रथः।

**शल्यः-** बाढम्। (चोदयति)

**कर्णः-** अहो नु खलु-

**अन्योन्यशस्त्रविनिपातनिकृत्तगात्र-**
**योधाश्ववारणरथेषु महाहवेषु।**
**क्रुद्धान्तकप्रतिमविक्रमिणो ममापि**
**वैधुर्यमापतति चेतसि युद्धकाले।।**

भो कष्टम्।

**पूर्वं कुन्त्यां समुत्पन्नो राधेय इति विश्रुतः।**
**युधिष्ठिरादयस्ते मे यवीयांसस्तु पाण्डवाः।।**

**अयं स कालः क्रमलब्धशोभनो**
**गुणप्रकर्षो दिवसोऽयमागतः।**
**निरर्थमस्त्रं च मया हि शिक्षितं**
**पुनश्च मातुर्वचनेन वारितः।।**

भोः शल्यराज! श्रूयतां ममास्त्रस्य वृत्तान्तः।

**शल्यः-** ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम्।

**कर्णः-** पूर्वमेवाहं जामदग्न्यस्य सकाशं गतवानस्मि।

**शल्यः-** ततस्ततः।

**कर्णः-** ततः

**विद्युल्लताकपिलतुङ्गजटाकलाप-**
**मुद्यत्प्रभावलयिनं परशुं दधानम्।**
**क्षत्रान्तकं मुनिवरं भृगुवंशकेतुं**
**गत्वा प्रणम्य निकटे निभृतः स्थितोऽस्मि।।**

**शल्यः-** ततस्ततः।

**कर्णः-** ततो जामदग्न्येन ममाशीर्वचनं दत्वा पृष्टोऽस्मि। को भवान्? किमर्थमिह आगतः? इति।

**शल्यः-** ततस्ततः।

**कर्णः-** ततः 'भगवन्! अखिलान्यस्त्राण्युपशिक्षितुमिच्छामि' इत्युक्तवानस्मि।

**शल्यः-** ततस्ततः।

**कर्णः-** तत उक्तोऽहं भगवता 'ब्राह्मणेषूपदेशं करिष्यामि न क्षत्रियाणाम्' इति।

**शल्यः-** अस्ति खलु भगवतः क्षत्रियवंश्यैः पूर्ववैरम्। ततस्ततः।

**कर्णः-** ततो नाहं क्षत्रिय इति अस्त्रोपदेशं ग्रहीतुमारब्धं मया।

**शल्यः-** ततस्ततः।

**कर्णः-** ततः कतिपयकालातिक्रमे कदाचित् फलमूलसमित्कुशकुसुमाहरणाय गतवता गुरुणा सहानुगतोऽस्मि।

**शल्यः-** ततस्ततः।

**कर्णः-** ततः स गुरुः वनभ्रमणपरिश्रमात् मदङ्के निद्रावशमुपागतः।

**शल्यः-** ततस्ततः।

**कर्णः-** ततः-

**कृत्ते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये**
**निद्राच्छेदभयादसह्यत गुरोर्धैर्यात्तदा वेदना।**
**उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो**
**बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते सन्त्विति।।**

**शल्यः-** अहो कष्टमभिहितं तत्र भवता।

**कर्णः-** परीक्षामहे तावदस्त्रस्य वृत्तान्तम्। (तथा कृत्वा) एतान्यस्त्राणि निर्वीर्याणीव लक्ष्यन्ते।

अपि च-

**इमे हि दैन्येन निमीलितेक्षणा**
**मुहुः स्खलन्तो विवशास्तुरङ्गमाः।**
**गजाश्च सप्तच्छददानगन्धिनो**
**निवेदयन्तीव रणे निवर्तनम्॥**

शङ्खदुन्दुभयश्च निश्शब्दाः।

**शल्यः-** भोः! कष्टं किं नु खल्विदम्।

**कर्णः-** शल्यराज! अलमलं विषादेन।

**हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।**
**उभे बहुमते लोके नास्ति निष्फलता रणे॥**

अपि च -

**इमे हि युद्धेष्वनिवर्तिताशाः**
**हयास्सुपर्णेन समानवेगाः।**
**श्रीमत्सु काम्भोजकुलेषु जाताः**
**रक्षन्तु मां यद्यपि रक्षितव्यम्॥**

अक्षयोऽस्तु गोब्राह्मणानाम्। अक्षयोऽस्तु पतिव्रतानाम्। अक्षयोऽस्तु रणेषु अपराङ्मुखानां यौधपुरुषाणाम्। अक्षयोऽस्तु मम प्राप्तकालस्य। एष भोः प्रसन्नोऽस्मि।

**समरमुखमसह्यं पाण्डवानां प्रविश्य**
**प्रथितगुणगणाढ्यं धर्मराजं च बद्ध्वा।**
**मम शरवरवेगैरर्जुनं पातयित्वा**
**वनमिव हतसिंहं सुप्रवेशं करोमि॥**

शल्यराज! यावद्रथमारोहावः।

**शल्यः-** बाढम्।

(उभौ रथारोहणं नाटयतः)

**कर्णः-** शल्यराज! यत्रासावर्जुनः तत्रैव चोद्यतां रथः।

(नेपथ्ये)

(भोः कर्ण! महत्तरां भिक्षां याचे)

**कर्णः-** (आकर्ण्य) अये वीर्यवान् शब्दः।

**श्रीमानेष न केवलं द्विजवरो यस्मात्प्रभावो महा-**
**नाकर्ण्य स्वरमस्य धीरनिनदं चित्रार्पिताङ्गा इव।**
**उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्राननाः**
**तिष्ठन्त्यश्ववशाङ्गयष्टि सहसा यान्तो ममैते हयाः।।**

आहूयतां स विप्रः। न न। अहमेव आह्वयामि। भगवन्नित इतः।

(ततः प्रविशति ब्राह्मणरूपेण शक्रः)

**शक्रः-** भो मेघाः! सूर्येणैव निवर्त्य गच्छन्तु भवन्तः।
(कर्णमुपगम्य) भो कर्ण! महत्तरां भिक्षां याचे।

**कर्णः-** दृढं प्रीतोऽस्मि भगवन्!

**यातः कृतार्थगणनामहमद्य लोके**
**राजेन्द्रमौळिमणिरञ्जितपादपद्मः।**
**विप्रेन्द्रपादरजसा तु पवित्रमौळिः**
**कर्णो भवन्तमहमेष नमस्करोमि।।**

**शक्रः-** (आत्मगतम्) किं नु खलु मया वक्तव्यम्। यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुः भविष्यति। यदि न वक्ष्ये मूढ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि? भवतु, दृष्टम्।

(प्रकाशम्) भो कर्ण! सूर्य इव, चन्द्र इव, हिमवानिव, सागर इव तिष्ठतु ते यशः।

**कर्णः-** भगवन्! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्।

कुतः-

**धर्मो हि यत्नैः पुरुषेण साध्यः**
**भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात्प्रजापालनमात्रबुद्ध्या**
**हतेषु देहेषु गुणा धरन्ते।।**

भगवन्। किमिच्छसि। किमहं ददामि।

**शक्रः-** महत्तरां भिक्षां याचे।

**कर्णः-** महत्तरां भिक्षां भवते प्रदास्ये। श्रूयन्तां मद्विभवाः।

**गुणवदमृतकल्पक्षीरधाराभिवर्षि**
**द्विजवर! रुचितं ते तृप्तवत्सानुयात्रम्।**
**तरुणमधिकमर्थिप्रार्थनीयं पवित्रं**
**विहितकनकशृङ्गं गोसहस्रं ददामि।।**

**शक्रः-** गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण। नेच्छामि।

**कर्णः-** किं नेच्छति भवान्? इदमपि श्रूयताम्।

**रवितुरगसमानं साधनं राजलक्ष्म्याः**
**सकलनृपतिमान्यं मान्यकाम्भोजजातम्।**
**सुगुणमनिलवेगं युद्धदृष्टापदानं**
**सपदि बहुसहस्रं वाजिनां ते ददामि।**

**शक्रः-** अश्व इति। मुहूर्तकमारोहामि। नेच्छामि कर्ण। नेच्छामि।

**कर्णः-** किं नेच्छति भवान्? अन्यदपि श्रूयताम्।

**मदसरितकपोलं षट्पदैस्सेव्यमानं**
**गिरिवरनिचयाभं मेघगंभीरघोषम्।**
**सितनखदशनानां वारणानामनेकं**
**रिपुसमरविमर्दं वृन्दमेतद्ददामि।।**

**शक्रः-** गज इति। मुहूर्तकमारोहामि। नेच्छामि कर्ण। नेच्छामि।

**कर्णः-** किं नेच्छति भवान्? अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।

**शक्रः-** गृहीत्वा गच्छामि। (किञ्चिद्गत्वा) नेच्छामि कर्ण। नेच्छामि।

**कर्णः-** तेन हि जित्वा पृथिवीं ददामि।

**शक्रः-** पृथिव्या किं करिष्यामि।

**कर्णः-** तेन हि अग्निष्टोमफलं ददामि।

**शक्रः-** अग्निष्टोमफलेन किं कार्यम्।

**कर्णः-** तेन हि मच्छिरो ददामि।

**शक्रः-** अविहा। अविहा।

**कर्णः-** न भेतव्यम्। न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।

**अङ्गैस्सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं महास्त्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्यां**
**प्रीत्या मया भगवते रुचितं यदि स्यात्॥**

**शक्रः-** (सहर्षम्) ददातु ददातु।

**कर्णः-** (आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्य उपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितुम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः-** अङ्गराज! न दातव्यम्। न दातव्यम्।

**कर्णः-** शल्यराज! अलमलं वारयितुम्। पश्य-

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति॥**

तस्माद् गृह्यताम्। (निकृत्य ददाति)

**शक्रः-** (गृहीत्वा आत्मगतम्) हन्त गृहीते एते। पूर्वमेवार्जुनविजयार्थं सर्वदेवैः यत् समर्थितं तदिदानीं मयानुष्ठितम्। तस्मादहमपि ऐरावतमारुह्यार्जुन-कर्णयोः द्वन्द्वयुद्धं पश्यामि। (निष्क्रान्तः)

**शल्यः-** भो अङ्गराज! वञ्चितः खलु भवान्।

**कर्णः-** केन?

**शल्यः-** शक्रेण।

**कर्णः-** न खलु। शक्रः खलु मया वञ्चितः।

कुतः-

**अनेकयज्ञाहुतितर्पितो द्विजैः**
**किरीटिमान् दानवसंघमर्दनः।**
**सुरद्विपास्फालनकर्कशाङ्गुलिः**
**मया कृतार्थः खलु पाकशासनः।।**

(प्रविश्य ब्राह्मणरूपेण)

**देवदूतः-** भो कर्ण! कवचकुण्डलग्रहणाज्जनितपश्चात्तापेन पुरन्दरेणानुगृहीतोऽसि। पाण्डवेषु एकपुरुषवधार्थम् विमलानाम शक्तिरियं परिगृह्यताम्।

**कर्णः-** धिक्। दत्तस्य न परिगृह्णामि।

**देवदूतः-** ननु ब्राह्मणवचनाद् गृह्यताम्।

**कर्णः-** ब्राह्मणवचनमिति। न मयातिक्रान्तपूर्वम्। कदा लभेय।

**देवदूतः-** यदा स्मरसि तदा लभस्व।

**कर्णः-** बाढम्। अनुगृहीतोऽस्मि। प्रतिनिवर्तताम् भवान्।

**देवदूतः-** बाढम्।

(निष्क्रान्तः)

**कर्णः-** शल्यराज! यावद्रथमारोहावः।

**शल्यः-** बाढम्।

(रथारोहणं नाटयतः)

**कर्णः-** अये शब्द इव श्रूयते। किं नु खल्विदम्?

**शङ्खध्वनिः प्रलयसागरघोषतुल्यः**
**कृष्णस्य वा न तु भवेत् स तु फल्गुणस्य।**
**नूनं युधिष्ठिरपराजयकोपितात्मा**
**पार्थः करिष्यति यथाबलमद्य युद्धम्।।**

शल्यराज! यत्रासावर्जुनः तत्रैव चोद्यतां रथः।

**शल्यः-** बाढम्।

(भरतवाक्यम्)

**सर्वत्र सम्पदस्सन्तु नश्यन्तु विपदस्सदा।**
**राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः।।**

(निष्क्रान्तौ)

***********

## अभ्यासः

### १. कठिनशब्दार्थाः

१. सुपर्वाणः - देवाः
२. दैत्येन्द्रः - राक्षसेन्द्रः
३. सुररिपुः - राक्षसः
४. सङ्ग्रामे - युद्धे
५. तुमुले - भयङ्करे
६. वैधुर्यम् - दैन्यम्
७. यवीयांसः - कनिष्ठाः

८. निदाघसमयः - ग्रीष्मकालः

९. निभृतम् - मैनम्

१०. भृगुवंशकेतुः - परशुरामः

११. हयाः - अश्वाः

१२. षट्पदैः - भ्रमरैः

१३. वारणः - गजः

१४. पादपाः - वृक्षाः

१५. करजाः - नखाः

१६. कुलिशानि - वज्राणि

१७. योधाः - सैनिकाः

**प्रश्नाः**

१. कर्णभारं केन विरचितम्?

२. कीदृशं वस्तु तथैव तिष्ठति?

३. भृगुवंशकेतुः कः?

४. नृपश्रियः कीदृशाः?

# २ वज्रं वज्रेण भिद्यते

पण्डित ओगेटि. परीक्षित् शर्मा

## परिचयः

रूपकोऽयं पण्डित ओगेटि.परीक्षित् शर्मामहोदयैः विरचितः। एते महाभागाः आन्ध्रदेशे २०-०८-१९३० दिनाङ्के जनिं लेभिरे। एते गीर्वाणवाण्यां सप्तविंशतिनाटकानां प्रणेतारः, कालिदासपारितोषिकपुरस्कृतस्य यशोधरामहाकाव्यस्य रचयितारः, जनपदनृत्यगीत-मञ्जर्यादि जनपदगीतानां निर्मातारः तदभिनेतारश्च सन्ति। एतैः विरचितेषु नाटकेषु १४ पौराणिकानि, ६ ऐतिहासिकानि ७ सामाजिकानि च सन्ति। आधुनिककविमण्डले कनिष्ठिकाप्रथितास्त्वेते नैकपुरस्कारैः पुरस्कृताः। तेषु मध्यप्रदेशशासनेन प्रदत्तः कालिदासपुरस्कारः विशिष्टं स्थानमावहति। १९९० वत्सरे एतैः श्रीमत्प्रताप-रामायणमहाकाव्यस्य साहित्यअकादमी पुरस्कारश्च प्राप्तः। एते संस्कृत-आन्ध्र-अङ्ग्ल-हिन्दी-मराठीभाषासु प्रवीणाः। पण्डित-महाकवि-गीर्वाणगेयकविमण्डलचक्रवर्तीत्यादिबिरुदैः सत्कृता एते महाशयाः।

### पाठ्यभागपरिचयः

**वज्रं वज्रेण भिद्यते** इति रूपकं महाभारतकथाश्रितम्। रूपकेऽस्मिन् द्रोणद्रुपदयोः मैत्री, स्वबालकस्य दुर्बलत्वं वीक्ष्य खिन्नायाः स्वपत्न्याः प्रेरणया गोदानं स्वीकर्तुं द्रुपदं प्रति द्रोणगमनम्, तेन द्रुपदेन द्रोणस्य अवमाननम्, द्रोणादेशानुसारं द्रुपदं बद्ध्वा आनेतुम् अर्जनगमनम्, अर्जुनकृतं द्रुपदबन्धनम्, द्रुपदस्य भग्नदर्पत्वमित्यादिविषयाः उपवर्णिताः।

## पाठ्यभागः

(ततः प्रविशतः द्रोणद्रुपदौ)

**द्रोणः-** सखे! द्रुपद! आवां परिसमाप्तविद्यौ। अतः परं गृहस्थाश्रमं प्रविशावः।

**द्रुपदः-** अरे! सुहृत्! द्रोण! अहं तु क्षत्रियः। त्वं ब्राह्मणः। अपि च आवां सुहृदौ। एकशयने एकपात्रे सुप्तवन्तौ भुक्तवन्तौ, सहाध्यायिनौ, विद्यापारङ्गतौ। आवां स्नेहः एवमेव सर्वथा वर्धिष्णुतां भूयात् इति मामकीनः विचारः।

**द्रोणः-** अरे! द्रुपद! आवां जन्मतः ब्राह्मणक्षत्रियौ। किन्तु विद्यया कर्मणा क्षात्रवन्तौ ववृधिवहे।

**द्रुपदः-** मित्र! द्रोण! मम पितुः आशा एवमस्ति। प्रथमतः मम विवाहः विधेयः। सपदं राज्यपट्टाभिषेकः कर्तव्य इति।

**द्रोणः-** अरे! सुहृद्! यदि त्वं राजा भविष्यसि मां नूनं विस्मरिष्यसि।

**द्रुपदः-** तथा नाहं विस्मरिष्यामि।

**द्रोणः-** तवाभिप्रायः कालान्तरेण रूपान्तरं धारयिष्यति। कालक्रमेण समयानुकूलं बुद्धिः परिणमति।

**द्रुपदः-** तथा न भवितुमर्हति। पश्य।

**अहं राजा भविष्यामि मया सार्धं भवान् प्रियम्।**
**भुनक्तु कामं सर्वस्वं वित्तं भोगान् सुखानि च।।**

**द्रोणः-** (विहस्य) अरे! द्रुपद! अहं कथं राज्यसौख्यं नृपतिरिव अनुभोक्ष्यामि।

**द्रुपदः-** कथं नहि। अवरोधः कः।

**द्रोणः-** अरे! त्वं जानासि, यत् ब्राह्मणानां ज्ञानोपार्जनमेव कर्तव्यम्। न तु धनोपार्जनं सुखानुभूतिश्च इति।

द्रुपदः- कालप्रभावेण सकलम् अस्तव्यस्तं भवति जगति जन्तूनाम्।

द्रोणः- अहो! ते विचारधारा प्रशंसनीया।

**न भवन्ति महात्मानः सर्वे जगति मानवाः।**
**तादृशाः विरलास्सन्ति तस्मात्त्वं मे सुहृद्वरः।।**

द्रुपदः- अरे! कुम्भसम्भव! त्वं निश्शङ्कं तव कामनापूर्त्यै मम सकाशं समागच्छ। तव कामना सफली भविष्यति।

द्रोणः- मित्रोत्तम! त्वं मे बाल्यमित्रम्। ते पिता मम पिता च बाल्यमित्रौ। तस्मात् आवयोः मैत्री पारंपर्येण सम्प्राप्ता। अयं सम्बन्धः अच्छेद्यः अविभाज्यः।

द्रुपदः- सत्यमेव, इयं मैत्री अविभाज्या। सातत्येन प्रवर्धिनीया।

(इति द्रोणस्य दक्षिणहस्तं स्वीयदक्षिणहस्तेन गृहीत्वा चालनं करोति)

द्रोणः- अयि मित्र! अहम् अभिनन्दामि ते विशालभावनां सौहार्दञ्च।

द्रुपदः- अरे! कलशसम्भव! आवयोर्मध्ये अन्तरं किमपि न विद्यते।

द्रोणः- अन्तरं किमपि न विद्यते। किन्तु भावनायामन्तरं विद्यते।

द्रुपदः- जगति मानवास्सर्वे शरीरदृष्ट्या समानाः। किन्तु मानसिकदृष्ट्या विभिन्नाः।

द्रोणः- सत्यमेव, सर्वेषामवयवनिर्माणमेकमेव भवति।

द्रुपदिः- किन्तु भावनाकृतिः विभिन्ना भवति।

द्रोणः- आहारविहारेऽपि वैविध्यं भवति।

द्रुपदः- किन्तु आवयोर्मध्ये न किमप्यन्तरं विद्यते यस्मिन् कस्मिन् विषयेऽपि।

द्रोणः- मित्र! तस्मात् आवां समवयस्कौ। समानशीलिनौ। समानभावुकौ। सर्वत्रापि समानता प्रतिभाति।

द्रुपदः- आवयोर्मध्ये सर्वेषु विषयेषु अविनाभावसम्बन्धः विद्यते।

**द्रोणः-** सुष्ठु भावितं त्वया।

**द्रुपदः-** श्रृणु, अहं राजा।

**द्रोणः-** अहं मन्त्री।

**द्रुपदः-** अहं शरीरम्।

**द्रोणः-** अहं प्राणाः।

**द्रुपदः-** आवां सूर्यचन्द्रौ।

**द्रोणः-** आवां दिवारात्रम्।

**द्रुपदः-** आवां सम्बन्धः अविभाज्यः।

**द्रोणः-** सहाध्यायिरूपेण सम्बन्धः पटुचिक्कणात्मकः बभूव।

**द्रुपदः-** विद्यार्थि दशा सर्वासु दशासु शक्तिसमन्विता।

**द्रोणः-** आवां समानशीलिनौ समानीव आकूतिः। समानी हृदयानिवः।

(इति द्रुपदमालिङ्ग्य) मित्र श्रृणु,

**सौहार्दपूर्णं वरमित्रभावं पुराणरूपं जगति प्रसिद्धम्।**

**विलोक्य मे कौतुकमेव जात रे मित्र! नित्यं शुभमस्तु लोके।।**

(इति निष्क्रान्तौ)

**द्रोणः-** (ज्यावल्लीं बध्नाति, कृपी सम्मार्जन्या गृहं मार्जयन्ती आस्ते)

**कृपी-** किं कुर्याम्। जीवनं सर्वं कष्टमयं भवति। न कस्यापि कुटुम्बे रक्तिः विद्यते। वेलायां समागत्य भुक्त्वा गच्छति कुटुम्बीकः। गृहे किं विद्यते किं न विद्यते इति न कोऽपि विचारयति। स्त्रियो हि नाम गृहे दास्यमनुभवन्त्यः

पुरुषाणां सुखदात्र्यः। अहो! किमेतज्जन्म। अस्मिन् संसारे स्त्रीणां न कापि स्वतन्त्रता विद्यते। कुटुम्बिनीषु कुटुम्बीकानां न कोऽपि आदरभावः न काप्यनुकम्पा च विद्यते। स्त्रीजन्मनः अरण्ये तरुजन्म श्रेष्ठतरं भाति।

(इति सक्रोधं सवेगं सम्मार्जनं कुर्वन्ती आस्ते)

**द्रोणः-** किं भवती क्रुद्धा कृशानुः भवति?

**कृपी-** नाहं क्रुद्धा, किन्तु चिन्ताक्रान्तास्मि।

**द्रोणः-** चिन्तायाः निदानं किम्?

**कृपी-** अयि भोः! बालः अश्वत्थामा दिने दिने व्यपचीयमानशरीरः निर्बलः भवति।

**द्रोणः-** किं कुर्याम् अहं तस्य बलविषये?

**कृपी-** खाद्यपदार्थेषु पौष्टिकपदार्थः न्यूनः भवति।

**द्रोणः-** तस्य कृते किं कुर्यामहम्?

**कृपी-** किं कर्तव्यमिति नाहं भणामि।

**द्रोणः-** हञ्जे, खाद्यपदार्थेषु पौष्टिकाहारस्य आवश्यकतामङ्गीकरोमि। किन्तु जन्मतः सङ्क्रामितस्य निर्बलस्य पौष्टिकाहारोऽपि अजीर्णं जनयिष्यति।

**कृपी-** अत्र सर्वे बालाः प्रातः उत्थाय गोक्षीरमासेवन्ते।

**द्रोणः-** वयं निर्धनाः। अस्माकं गोक्षीरं कथं लभ्यं भविष्यति।

**कृपी-** तस्मादहं वच्मि। यथाकथञ्चित् वरिष्ठकपिलामेकां सम्पादयस्वेति।

**द्रोणः-** अत्र न कोऽपि दाता अस्ति। भवतु नाम। अश्वत्थामानं तेषां बालानां सकाशं प्रेषय। तैस्साकं सोऽपि किञ्चित् क्षीरं पास्यति।

**कृपी-** तेषां मध्ये कलहः भवति। तस्मात् अहं न प्रेषयेयं बालम्।

**द्रोणः-** बालानां कलहः भवत्येव। किन्तु सः कलहः तत्कालीनः।

**कृपी-** बालानां कलहकारणात् पितरौ कलहायमानौ भवतः।

**द्रोणः-** तथाकरणं मौर्ख्यमेव। बालाः कलहायन्ते अनन्तरं क्रीडन्ते। किन्तु ज्येष्ठाः कलहायमानाः यावज्जीवं मौर्ख्येन दर्शयिष्यन्ति तेषां मानसिकसङ्कुचितत्वम्।

**कृपी-** बालाः ज्येष्ठमण्डलात् अधिकतरं बुद्धिमन्तः भवन्ति।

**द्रोणः-** बालः अधुना कुत्र गतः?

**कृपी-** सः बालमित्राणां सन्निधिं गतः।

**द्रोणः-** किमर्थं गतः?

**कृपी-** दुग्धपानं कर्तुं गतः।

**द्रोणः-** साधुकृतं तेन। पश्य-

**भिक्षादानेन लोकेऽस्मिन् ब्राह्मणो जीवते धिया।**
**तस्मात् साधुकृतं तेन गोक्षीरास्वादने प्रिये॥**

**कृपी-** बाल्यात्प्रभृति सः परालम्बनपरः जातः। हा धिक् कष्टम्।

**द्रोणः-** प्रिये! बालः रुदन् इवास्ते पश्य।

**कृपी-** (उत्थाय गत्वा विलोक्य रुदता बालेन साकं प्रविश्य) अरे! किमर्थं रोदिसि?

**बालः-** मातः! ते सर्वे क्षीरं मह्यमदत्वैव अपिबन्।

**कृपी-** मा रोदि। अहं ते गोक्षीरं दास्यामि।
(इति अन्तः गत्वा पिष्टमिश्रितजलम् आनीय
एकस्मिन् पात्रे पूरयित्वा तस्मै गोक्षीरमिति ददाति)

**बालः-** (सन्तोषभरेण) मातः! त्वं मे अत्यन्तं स्पृहणीयासि। (इति पिबन् परमानन्देन मुखशब्दं कुर्वन्) मातः अहम् उदरपूरं गोक्षीरं पिबामि। ते बालाः अर्धकुक्षि-क्षीरं पीत्वा प्रमोदन्ते। (इति हसति)

**कृपी-** (विचारयन्ती) वत्स! पिब, सानन्दं पिब एतदेव ते गोक्षीरम्। वयं दरिद्राः। कथं प्रत्यहं गोक्षीरं पास्यामः।

**बालः-** (सर्वं पीत्वा) कलशं भूमौ निक्षिप्य नृत्यन् गायति)

**द्रोणः-** (सर्वं बालवर्तनं विलोक्य स्वगतम्) गोक्षीरलालसोऽयं सुतः पिष्टोदकं पीत्वा स्वात्मानं विस्मृत्य नृत्यति किमिदमाश्चर्यम्? दृष्ट्वा तस्य स्थितिं मे हृदयं विदलति।

**कृपी-** (द्रोणं विलोक्य) किमर्थं यूयं विचाराधीनाः?

**द्रोणः-** बालस्य अज्ञानवर्तनात् मे हृदयं विदलति।

**कृपी-** किमर्थं विदलति? वयं असमर्थाः। कार्यसाधने अकुशलाः। वयं कार्यकरणे अक्षमाः।

**द्रोणः-** कृपि! तथा मा वद। पिष्टमिश्रितपानीयं पीत्वा तेन सत्यमेव गोक्षीरं पीतमिति आनन्देन स्थितम्। तद्दृश्यं मे अत्यन्तहृदयविदारकं भवति। मम असहनं भवति।

**धिगस्तु मे निर्धनमौर्ख्यजीवितं**
**न चास्ति वित्तं न च धेनुमण्डलम्।**
**बालाय दातुं मम नास्ति दुग्धं**
**दग्धो भवत्यत्र ममान्तरङ्गः।।**

(इति विचारतप्तः भवति)

**कृपी-** चिन्तां विसृज्य कर्मयोगी भव।

**द्रोणः-** किं कुर्यामहम्? कमाश्रयेयम्? को नाम दास्यति?

**कृपी-** प्रिय! उक्तं भवता गर्भाधानस्य प्रथमरजन्यां यत् तत्र भवतां मित्रमेकं द्रुपदो नाम, सः सम्पन्नवान् इति। अधुना तस्य सकाशं गत्वा गोदानं स्वीकुर्वन्तु।

**द्रोणः-** आम्। सत्यमुक्तमेव मया। किन्तु तद्बहुकालात्प्राक् संवृत्तम्। अधुना सः मयि स्निह्यति उत न हि। अयं प्रश्नः भवति।

**कृपी-** **मित्रं च मित्रवद्लोकं करदानैः पुनाति च।**
**तस्मात्त्वं तत्र गत्वैव प्रार्थयस्व महीपतिम्॥**

**द्रोणः-** प्रिये! अहो ते समयस्फूर्तिविशेषः। तस्मादेव भार्या नाम करणेषु मन्त्री इति भणितं पूर्वसूरिभिः। सकुटुम्बम् आवां मे मित्रं द्रुपदं द्रष्टुं गच्छावः।

**कृपी-** यदि सः अधुना स्मरिष्यति सर्वमपि सुगमं सुकरं भविष्यति।

**द्रोणः-** अयं अवश्यमेव स्मरिष्यति माम्। तेनोक्तं च यतः-
अहं राजा भविष्यामि...........................सखे।

**कृपी-** अहो साधु प्रतिपादितं तव मित्रेण। अद्यैव तस्य सन्निधिं गच्छावः।

**द्रोणः-** शुभस्य शीघ्रम्। एहि गच्छावः।

(द्रुपदराजसभास्थानम्)

(सिंहासने द्रुपदः उपविष्टः अस्ति। पार्श्वे छत्रचामरवाहिन्यौ वीजयतः।)

**मन्त्री-** अयि राजन्! गङ्गायाः दक्षिणतः विराजमानधरणीमण्डलं शासयतः भवतः राज्ये न कुत्रापि भीतिः चौर्यम् अमानुषचेष्टादिकं दृश्यते। ते प्रापणीयान् दानांशभागान् वयं सामन्तराजानः सभक्तिकं प्रेषयामहे। तव एकच्छत्राधिपत्ये वयं सर्वे अपूर्वानन्दं सुखं च अनुभवामः। ते सर्वसन्मङ्गलानि भवन्तु। समस्तसौख्यानि भवन्तु इति परमेश्वरं प्रार्थयामहे।

(इति पठित्वा मन्त्री उपविशति)

**वेत्रहस्तः-** (ततः प्रविशति) जयतु जयतु महाराज। भरद्वाजपुत्रः कलशसम्भवः द्रोणाचार्यः सदारपुत्रः तत्र भवतः द्रष्टुं द्वारि तिष्ठति।

**राजा-** (आत्मगतम्) द्रोणाचार्यः सभार्यापुत्रः द्वारि तिष्ठति। सः मां दिदृक्षुरस्ति। अनुपदं प्रवेशय। (इति आज्ञापयति)

**वेत्रहस्तः-** बाढम् (इति नमस्कृत्य गच्छति)

**राजा-** मन्त्रि! भवान् गच्छतु। (मन्त्री गच्छति। ततः प्रविशति सदारपुत्रः द्रोणः।)

**द्रोणः-** स्वस्ति भवते।

**राजा-** नमो वः। (उत्थाय नमस्करोति। तेषामासनं दर्शयति)

(सर्वे उपविष्टाः)

**द्रोणः-** यूयं द्रुपदमहाराजाः। को वाऽहमिति भवतां विदितमेव स्यात् इति मे वितर्कः।

**द्रुपदः-** नाहं जाने।

**द्रोणः-** बहुकालवियोगात् विस्मृतवन्तः अभवन्निति मे कल्पना।

**द्रुपदः-** कालविपर्ययेण स्मृतिविभ्रमः भवति।

**द्रोणः-** यदि स्मृतिविभ्रमः भवति तर्हि अनुमानेन सुयोज्यः भविष्यति। किन्तु न चित्तविभ्रमः।

**द्रुपदः-** चित्तविभ्रमोऽपि जातः।

**द्रोणः-** महाराज!

**शरीरे शीर्यमाणे तु बुद्धिर्गच्छति हीनताम्।**
**संपदां निचये राजा तेजो बुद्धिः विराजते।।**

महाराजा अहं ब्रवीमि श्रृणोतु मम नाम द्रोणः। भरद्वाजतनयः।

**द्रुपदः-** एकदा श्रुतं मया पूर्वम्।

**द्रोणः-** किमुच्यते भवता?

**द्रुपदः-** सत्यं ब्रवीमि।

**द्रोणः-** वयसि संवृत्तं सर्वं विस्मरणीयं भवति तत्सत्यमेव।

**द्रुपदः-** भवता सत्यमुक्तम्।

**द्रोणः-** राजन्। कौमारदशायां गुरुकुलवासे यत् संवृत्तं तत् विस्मरणीयं कथं भवति। श्रृणोतु-

**क्रीडारसः परं राजन् सर्वेषु च रसेष्वपि।**
**नित्यं संस्मरणीयोऽस्ति भवान् तं विस्मृतः कथम्।।**

**द्रुपदः-** द्रोण! मे जीवने अहं सर्वमपि शैशवोत्पन्नं सर्वघटनादिकं विस्मृतोऽस्मि।

**द्रोणः-** राजन्! धनदर्पेण तत्सर्वं त्वया विस्मृतम्। त्वमधुना धनान्धोऽसि।

**द्रुपदः-** मन्दात्मन्! श्रियाहीनैः धनच्युतैः सख्यं भवति? त्वामहं न जानामि। किन्तु ते एकरात्रं भोजनं दास्यामि।

**द्रोणः-** (सक्रोधमुत्थाय) नमस्तेऽस्तु महाराज! कालं निरीक्षस्व। सर्वदा कालः नैकरीत्या चलति। नावः शकटानि भवन्ति। शकटानि नावः भवन्ति। समयं निरीक्षस्व। आवयोः समागमः वैपरीत्येन भविष्यति।

(सपुत्रदार उत्थाय)

राजन्! विप्रकृतः पन्नगः फणां कुरुते, अन्ततः दशति च पश्य।

(इति प्रस्थितः)

(ततः प्रविशतः द्रोणार्जुनौ)

**द्रोणः-** वत्स! सव्यसाचिन्! त्वमधुना धनुर्विद्यायां कुशलोऽसि। मया यदधीतं तत्सर्वं त्वयि पश्याम्यहम्। त्वं सर्वेषु शिष्येषु मे प्रियतमः। सर्वाः मे आशाः त्वयि पुञ्जीभूताः भवन्ति। किं त्वं जानासि? किमर्थं त्वामहमेवं पश्यामि।

**अर्जुनः-** गुरो! नाहं किमपि जानामि। भवद्भिः यत् बोधितं तत्सर्वमवकलितमस्ति।

**द्रोणः-** त्वमेव मे प्रियशिष्यः। त्वमेव भक्तिमान्। विद्यावान्। भवता साधनीयं कार्यं विद्यते।

**अर्जुनः-** गुरो! किं तत्कार्यं कथयन्तु।

**द्रोणः-** तस्मादेव त्वामेकान्तप्रदेशमानीतवानस्मि। सावधानेन शृणु। मया उदीरितम्।

**अर्जुनः-** अवहितोऽस्मि।

**द्रोणः-** राजा द्रुपदः अहं च सहाध्यायिनौ। सकलविद्यासु सः मत्समानः। विशिष्य धनुर्विद्यायां अप्रतिहतकुशलः सः। तदा तेनोक्तम्-

(अहं राजा भविष्यामि इति श्लोकं द्रोणः पठति)

**अर्जुनः-** साधु। ततस्ततः।

**द्रोणः-** एकदा मे सुतः अश्वत्थामा गोक्षीरार्थं रोरूयमाणः आसीत्। तदाहं मम पत्न्या प्रेरितः एकां कपिलां गां प्रष्टुं द्रुपदस्य समीपमगच्छम्।

**अर्जुनः-** साधु कृतं भवद्भिः।

**द्रोणः-** तदा सः, 'मन्दात्मन्! श्रियाहीनैः धनच्युतैः सख्यं भविष्यति' इति अवोचत्।

**अर्जुनः-** धनश्रिया गर्वान्धः जातः द्रुपदः। ततस्ततः।

**द्रोणः-** तदाहं अयि राजन्! कालः विपर्ययः भवति। निरीक्षस्व आवयोः पुनः समागमाय इत्युक्त्वा प्रस्थितोऽहम्।

**अर्जुनः-** यथोचितं सुष्ठु प्रोक्तं भवद्भिः।

**द्रोणः-** तस्मादहं मनसि व्यथाविलः आगच्छन् वीट्या खेलयतां कौरवपाण्डवानां कौशलमपश्यम्। ततः प्रभृति भवद्भ्यः धनुर्विद्यां शिक्षितः। तस्यां त्वं मे प्रीतिकरः शिष्यः सञ्जातः। तस्मात्त्वं मे गुरुदक्षिणां प्रयच्छ।

**अर्जुनः-** गुरो! तदर्थं सन्नद्धोऽस्मि। किं रोचते भवद्भ्यः। आज्ञापयन्तु।

**द्रोणः-** जीवन्तं द्रुपदं बद्ध्वा मे चरणसन्निधिं प्रापय। इयमेव गुरुदक्षिणा दातव्या।

**अर्जुनः-** अनुगृहीतोऽस्मि। (इति नमस्कृत्य प्रस्थितः)

(द्रोणः वृक्षच्छायायां प्रस्थरे उपविशति। ततः प्रविशति सशस्त्रपाणिः अर्जुनः द्रुपदं हस्तग्राहं कृत्वा)

**अर्जुनः-** राजन्! प्रचल द्रोणाचार्यसन्निधिम्। (इति द्रुपदं समाकर्षति)

**द्रुपदः-** द्रोणाचार्यपादयोः पतति। (द्रोणः विहस्य)

**द्रोणः-** अयि भोः! यूयं द्रुपदमहाराजानः। केयं स्थितिः। अहो कालप्रभावः। आवयोः स्नेहः कथं भवतीति नाहं वदेयम्। मे शिष्येण धीमता त्वं पराजितोऽसि। न मया। त्वमधुना भग्नदर्पोऽसि। त्वं मे वशमागतोऽसि। त्वया सख्यं पुनः प्रार्थयेयम्। ते राज्यस्यार्धं ददामि। अवाप्नुहि।

**द्रुपदः-** ब्रह्मन्! त्वया सह शाश्वतीं प्रीतिमिच्छामि।

**द्रोणः-** सर्वदा सर्वथा आवां मित्रे। अहं भवता कृतं तिरस्कारं विस्मरामि। श्रृणु-

**पुष्पेण भिद्यते नैव वज्रं जगति पार्थिव।**
**ततो वज्रात्मना भाव्यं वज्रं वज्रेण भिद्यते।।**

**प्रश्नाः**

१. द्रोणद्रुपदयोः सम्बन्धः कीदृशः ?

२. बालानां कलहः कीदृशः ?

३. कृपी गोक्षीरं ददामीत्युक्त्वा पुत्राय किं दत्तवती ?

४. केन द्रुपदः गर्वान्धः जातः ?

३

# मूर्खराजकम्

पूजालाल:

## परिचय:

पाठ्यांशोऽयं श्रीपूजालालविरचितात् **बालनाटकानि** इत्यस्माद्ग्रन्थात् स्वीकृत:। ग्रन्थेऽस्मिन् त्रयोविंशतिनाटकानि वर्तन्ते। पूजालाल: पुदुच्चेरीस्थ अरविन्दाश्रमविद्यालये शिक्षक: आसीत्। अयं संस्कृते गुर्जरभाषायां च गीतानि, आलापान् नाटकानि च अरचयत्। अरविन्दाश्रम: श्रीमात्रा संस्थापित:। तया प्रेरितोऽयं महाभाग: विद्यालयस्थछात्राणाम् उपयोगाय नाटकान्येतानि विरचितवान्। रङ्गमञ्चे प्रयोगदृष्ट्या एतेषां नाटकानां सार्थकता न्यूनाधिका स्यात् नाम, किन्तु सम्भाषणशिक्षणदृष्ट्या एतानि अतीव उपयोगीनि इति निश्चयेन वक्तुं शक्यते।

### पाठ्यभागपरिचय:

स्वभर्तु: राज्ञ: भोजस्य कृते एकाकिन्या: राज्ञ्या: निरीक्षणम्, स्वमनोविनोदाय प्रियसखीं विद्यावतीमामन्त्रयितुं स्वसख्यो: प्रेषणम्, सम्भाषणं कृतवत्यो: तयो: सहसा राज्ञ: प्रवेशनम्, स्वपतिदेवं भोजराजं प्रति मूर्खराज इति राज्ञ्या: सम्बोधनम्, निर्विण्णेन भोजेन एतादृशसम्बोधनस्य कारणं ज्ञातुं स्वस्यास्थानं प्रविष्टान् कालिदासादिप्रमुखानुद्दिश्य मूर्खराज इति प्रयोगकरणम्, एवंविधसम्बोधनेन खिन्नेन महाकविकालिदासेन विना कारणं स्वोपरि आपतितं दोषमपनेतुं श्लोककथनम्, तदनन्तरं सभासद: प्रति भोजस्य क्षमायाचनम्, अन्त:पुरे पश्चात्तापपीडिताया: राज्ञ्या: अनुनयनमित्येते विषया अत्र उपवर्णिता:।

## पाठ्यभागः

**राज्ञी-** (स्वगतम्) एकाकिनी अहमधुना। महाराजो राजसभायां विराजते। न जाने कदा स धर्मनिष्ठः प्रजापालको राजकार्यात् अवकाशं लप्स्यते। प्रियतमस्य पुनर्दर्शनं यावत् कथं कालो नीयताम्। रहस्सखीं विद्यावतीं तावत् आनयामि स्वमनोविनोदाय।

(इत्युत्थाय यावद् बहिः कक्षं गच्छति तावत् परिचारकयोः मुक्तहास्यं शृणोति आकारयति च उभे)

अयि मालति! माधवि! आयातम् अत्र।

(उभे हास्यं पूर्णतया निरोद्धुम् अशक्नुवत्यौ हास्यव्याकुलमुख्यौ आगत्य)

**उभे-** आज्ञापयतु महाराज्ञी।

**राज्ञी-** (सस्मितम्) एतावत् हसथोः युवां किं निमित्तम्?

**उभे-** (ससङ्कोचम्) किमपि न हि। किमपि न हि। महाराज्ञि! क्षम्यतां क्षम्यताम्।

**राज्ञी-** कारणं विना किमपि प्रभवति कदापि? वदतं निर्भयं प्रहासप्रयोजनम्।

**मालती-** महाराज्ञि! कारणं तु अतीव तुच्छम्। अर्थहीन एव आवयोः प्रहासः।

**राज्ञी-** स्यात्। किन्तु ज्ञातुमिच्छामि कारणं तुच्छं सदपि।

**माधवी-** तर्हि श्रूयतां सानुग्रहम्। अवकाशं लब्ध्वा मिलिते आवां सल्लापं कुर्वत्यौ आस्व। इयं मालती वदति 'चतुरः सखि मे भर्ता (किञ्चित् स्मित्वा) यल्लिखति स तत् परो न वाचयति'। (राज्ञी अपि इदं श्रुत्वा स्मयते)

**मालती-** महाराज्ञि! इयं माधवी तु मत्तोऽपि अधिकतरं विचित्रं वदति 'तस्मादप्यधिको मे, स्वयमपि लिखितं स्वयं न वाचयति'।

**राज्ञी-** (उच्चैर्हसन्ती) सौभाग्यशालिन्यौ युवाम्। उभयोः स्वामिनौ महापण्डितौ। तादृशौ न दृश्येते महाराजस्य राजसभायामपि।

**मालती-** देव्यपि उपहसति नौ। ईदृशौ तौ कथं महापण्डितौ।

**राज्ञी-** सम्यक् उक्तं मया। तौ नूनं महापण्डितौ। न कापि शङ्का तत्र। यदि सन्देहो जायेत तर्हि स्ववचनं लिखित्वा ददामि। (इत्युक्त्वा कर्गजे लिखति, 'महापण्डितौ'। एतत्पठित्वा ते द्वे अपि प्रहसतः)

**उभे-** अवबुद्धम् अधुना। महापण्डितौ तौ।

**राज्ञी-** शृणुतं पुनः। यथा हासः, प्रहासः, उपहासः इति त्रयोऽपि अत्यन्तसमानाः तथैव पण्डितः, अपण्डितः, सुपण्डितः, कुपण्डितः, साक्षरः, निरक्षरः, दुरक्षरः इति सर्वेऽपि समानप्रायाः। यदि भेदो भवेत् तदा स अल्प एव। केवलम् एकाक्षरमितः। भवतु। युष्मत्कथया विनोदिता अस्मि। धन्यवादाः। अथ एकं मम कार्यं क्रियताम्। इतो गत्वा मे प्रियसखी विद्यावती मद्वचनेन एकान्तकक्षायाम् आमन्त्र्यताम्।

(इत्युक्त्वा अन्तः प्रविशति)

**उभे-** यदाज्ञापयति देवी। (निष्क्रामतः)

(अचिरात् विद्यावत्या सह उभे अन्तःपुरं प्रत्यागच्छतः।)

**उभे-** (विद्यावतीं प्रति) इत इतो भवती। (प्रतीक्षापरा राज्ञी अभ्युत्थाय)

**राज्ञी-** आयाहि आयाहि प्रियसखि! आस्यतां सुखम्।

**विद्यावती-** (सस्नेहस्मितम् उपविश्य) विमनस्केव कथम्? सखि! महाराजेन सह कलहयितवती किम्?

**राज्ञी-** तत्तु असम्भवम्। महाराजः एतावत् मयि स्निह्यति। एतावत् उदारः दाक्षिण्ययुक्तश्च। तथा कर्तुं न शक्नोमि सर्वथा। कदाचित् इच्छायां सत्यामपि न पारयामि कलहायितुम्।

**विद्यावती-** कलहेच्छा भवति किं कदाचित्?

**राज्ञी-** अथ किम्? कलहोऽपि प्रेम्णः सदङ्गमिति का नारी न जानाति।? परन्तु महाराजविषये तस्यावश्यकतापि अचिन्त्या। तत्र भवतः प्रेम मयि नित्यमेव प्रवृद्धिपरायणम्। अतः असहायाऽहम्।

**विद्यावती-** मम पतिस्तु न ईदृशः। समये समये स रुष्टोऽपि भवति। मम विद्याकला-विषयिका प्रीतिः तस्य अतीव अप्रिया। असहिष्णुः सः सरस्वत्याः सुकृतीः प्रति। सूक्ष्मभाविरसिकतारहितः सः प्रायो विषयवाञ्छी।

**राज्ञी-** तर्हि सखि मे, दुःखभागिनी त्वम्। सत्यमेव तव जीवनं तपोमयम्। न जाने, कथं तव साहाय्यं कुर्याम्।

**विद्यावती-** सख्याः स्नेहवचनेनैव मद्दुःखं दूरीभवति। सुखं च मामुपतिष्ठते। अहं राज्ञ्याः सौहार्दमुपभुञ्जे इति जानन् मम परिणेता राजप्रसादप्रार्थी किमपि साहसं न करोति मां प्रति। महर्णिनी इत्थमहं ते।

(नेपथ्ये) जयतु जयतु महाराजः। इत इतो महाराजः)

(सहसा राजा भोजः महिष्याः कक्षं प्रविश्य सख्योः समीपं गच्छति। राज्ञी च इत्थमसमये अस्थाने च राज्ञः अकस्मात् आगमनेन क्षुब्धभावेन वदति)

**राज्ञि-** आगम्यतां मूर्खराज!

(अनपेक्षितेन ईदृशेन सम्बोधनेन राजा दिङ्मूढवत् क्षणं स्थित्वा निरुत्तरं प्रतिनिवर्तते)

**विद्यावती-** (राज्ञः गमनात् परम्) अयि किमिदं सहसा उक्तम्? अपमानितो पतिदेव-महाराजः। असाधु सम्भूतम्।

**राज्ञी-** साधु वा असाधु वा। कृतमेव। तदन्यथा कथं भवेत्? मनस्विनीनामयं महान् दोषः यत् ताः स्वमन्तव्यहेतोः सहसैव प्रतिकार्यपराः भवन्ति। ममाप्ययं दोषः। अधुना तु तत्फलप्रतीक्षा एव कर्तव्या।

**विद्यावती-** त्वरितं गत्वा यत्नेन महाराजमुपच्छन्दय। आमन्त्रये त्वां पुनर्दर्शनाय शुभसमाचाराय च।

**राज्ञी-** पुनर्दर्शनाय प्रियसखि!

**विद्यावती-** स्वस्त्यस्तु ते सर्वदा।

(इत्युक्त्वा निष्क्रामति। राज्ञी च स्वकक्षं प्रविश्य द्वारं पिदधाति)

(स्थलम्- राज्ञः एकान्तकक्षः)

**राजा-** (स्वगतम्) ननु अपूर्वमेतद् यद् मत्प्रेमपरायणा, सुशीला, सुविनीता, सुमहा-कुला राज्ञी अकस्मात् मां **मूर्खराज** इति सम्बोधनेन सत्करोति। अनपेक्षितः ईदृशो व्यवहारः प्राणप्रियायाः। सोऽपि न रहसि किन्तु स्वसखीसमक्षम्। सम्भवतः प्रकृतिस्थया तया न भवितव्यम्। नो चेत् सा कदापि ईदृशं वचनं नोच्चारयेत्। विचित्रम् अहो अति विचित्रम्! तर्कातीतमिदं विमाननावचनम्। परन्तु अस्याः सहृदयत्वे सौशील्ये च मम एतावान् विश्वासो यद् अस्याः स वाक्प्रयोगः अकारण एव इति वक्तुं न शक्यते। अवश्यमेव केनचित् सत्कारणेन भवितव्यम्। परं सुष्ठु विचारयन् अपि न पारयामि अनुमातुं **मूर्खराज** सम्बोधनप्रयोजनम्। चिन्तावशात् निद्रा मे पलायिता, प्रलीनं मे प्रासन्न्यम्, विगतो मे ज्ञानगर्वः।

एक एव प्रश्नो ममाधुना व्याकुलयति- कथं ज्ञातव्यम् मूर्खराजप्रयोग-प्रयोजनम्। अस्तु। तर्हि युक्त्या एव अस्य रहस्यस्य भेदं समधिगमिष्यामि। बहवः सन्ति महाविद्वांसो मम राजनगरे। सभोपस्थानाय तान् सर्वान् नियन्त्रयिष्ये श्वः।

(राजसभा। राजा स्वयं सभासदां स्वागतार्थं द्वारे तिष्ठति। एकैकं कवि-पण्डित-श्रेष्ठि-ग्रामण्यादयो महाजनाः आगच्छन्ति। तान् प्रति प्रत्येकम्)

**राजा-** (पुरश्रेष्ठिनं प्रति) स्वागतं मूर्खराज!

(सम्बोधनेन चकितः सः क्षणं राज्ञो मुखम् अवलोक्य)

**पुरश्रेष्ठी-** (स्वगतम्) अहो असाधारणमिदं वसुधाधिपस्य वर्तनम्। सम्मानदो नृपः कथमद्य मामवमानयतीत्थम्! न जाने किमस्य जातम्। परमस्थाने प्रति-वचनम्।

(एवं विचिन्त्य तूष्णीं सभागृहं प्रविशति। तत आगच्छति ग्रामणीः)

**राजा-** स्वागतं भो मूर्खराज!

(स्तब्धो भवति सोऽपि। राजानं संशयग्रस्तदृष्ट्या निरूपयति)

**ग्रामणीः-** (स्वगतम्) कीदृशोऽयं विपर्ययः! कथमयं सम्भ्रान्तः सुशीलानां शिरोमणिः। किन्तु राजभिस्सह विवादो विनाशकः। राजा कालस्य कारणम्। नमस्कृत्य प्रयामि तावत्।

(इति सभास्थानकं गच्छति। ततः प्रविशत्येको महापण्डितः)

**राजा-** स्वागतम् मूर्खराज! स्वागतम्।

(पण्डितः अवाक् तिष्ठति। राजानं च दोलायमानदृष्ट्या समवलोकते)

**पण्डितः-** (स्वगतम्) केयं जडप्रवृत्तिर्महाराजस्य? कथं मतिमतां वरोऽसौ विपरीत-मतिर्जातः! नेदं सुस्थिरचित्तस्य वचनम् अनार्योचितम्। किमुत्तरं दातव्यमस्य? समुचितं मौनमेवात्र। उन्मत्तमूर्खसकाशे मौनं सर्वार्थसाधनम्।

(इति अन्तःप्रविशति)

(ततः कविसम्राट् कालिदासः उपायाति सगौरवम्)

**राजा-** (स्वल्पसङ्कोचपूर्वकम्) स्वागतं भो मूर्खराज!

अभूतपूर्वो व्यवहारोऽयं राज्ञ इति विचिन्त्य कालिदासः तत्रैव तिष्ठति। राजानं साक्षेपं दृष्ट्वा शीघ्रमेव इमं श्लोकं श्रावयति)

**कालिदासः-**

**खादन् न गच्छामि हसन् न जल्पे**
**गतं न शोचामि कृतं न मन्ये।**
**द्वाभ्यां तृतीयो न भवामि राजन्**
**किं कारणं भोज भवामि मूर्खः।।**

**राजा-** (क्षमायाचनपूर्वकम्) क्षम्यताम् क्षम्यताम् कविशिरोमणे! अपराद्धोऽहं मूर्खराजस्त्वयि प्रज्ञाप्रवरे। अयं विचित्रविधिः अवलम्बितो मया विशिष्ट-प्रयोजनवशात्। सिद्धश्च मम उद्देशो भवत्सरस्वतीप्रसादतः। आगम्यतां मया सह राजसभालङ्करणाय।

(इति उभौ सहैव राजसभां प्रविशतः सर्वे सदस्याश्च उत्थाय सम्मानयन्ति तौ राजराजकवीन्द्रौ)

**राजा-** सिंहासनारूढस्सन् भो भो राज्यरत्नभूताः सभासदः! प्रथममेवेयं मम प्रार्थना भवतः प्रति यत्किमपि रहस्यमुद्दिश्य यः असभ्यः व्यवहारो मया आचरितः स कृपया क्षन्तव्यः। मूर्खराजवत् तु मयैव वस्तुतः आचरितम्। क्षाम्यन्तु

मां महाजनाः मम राज्यस्य। अत्र भवान् महाकविः कालिदासो मम मनोगतस्य यथोचितम् उत्तरं दत्वा मां सम्यक् सन्तोषितवान्। अधमर्णोऽहमस्य महाभागस्य।

(कोशाध्यक्षं प्रति) आर्य अविलम्बमेव एकलक्षसुवर्णमुद्राः प्रेष्यन्ताम् कविकुलगुरोः शुभसदनम्। (उत्थाय) पुनर्दर्शनाय प्रवराः प्रियप्रजाजनाः! (इत्युक्त्वा सभासद्भिः प्रणम्यमानो महालयं प्रति प्रस्थितः।)

**राजा-** (स्वगतम्) श्रूयते यत् महाराज्ञी एकाकिनी वर्तते रोदनपरा। मूर्खवत् मया एव आचरितम् यत् सख्या सार्धं रहसि स्थितायाः प्रियायाः पार्श्वे सूचनरहितं सहसैव गत्वा समुपस्थितोऽहम्। मनस्विन्या तया सम्यक् उद्बोधितोऽहम्। गच्छामि तावत् सुप्रियायाः समीपं स्वयमेव।

(गत्वा कपाटम् अङ्गुल्या ताडयति)

**राज्ञी-** (अन्तरतः) कोऽस्ति द्वारे?

**राजा-** अहमेव देवि! उद्घाट्यतां द्वारं यथावकाशम्।

**राज्ञी-** (अश्रूणि परिमृज्य, द्वारम् उद्घाट्य) स्वागतम् महाराज! महती कृपा प्रदर्शिता दर्शनदानेन। महत्तरा कृपा दर्श्यतामधुना क्षमादानेन अपराधिन्यै।

**राजा-** देवि! पश्य पश्य प्रिये! अतिरोदनेन उच्छूने ते सुलोचने। अलमलमश्रुपातेन देवि! (इत्यश्रूणि प्रमार्जयति) सस्मितम्, देवि! श्रुणु। **पतरेको गुरुस्त्रीणां पतिरेकः परायणम्** इति यत् पुरातनैः उच्यते तत् सम्पूर्णं सत्यं नास्ति। **सती श्यामा गुरुः पुंसां समुद्धारणकारिणी** इत्यनेन चरणेनैव पूर्णसत्यं प्रकाश्यते। त्वामहं सद्गुरुं मन्ये यया उद्बोधितमानसः।

(इति निजपादपतनोत्सुकपतेः किञ्चिद्दूरम् अपसृत्य)

**राज्ञी-** आर्यपुत्र! अपराधिनीं मामधिकापराधिनीं मा कुरु।

**राजा-** अनवद्ये देवि! अन्नपूर्णे! ह्यः प्रभृति अहं क्षुधातुरः। मन्ये त्वामपि क्षुधातुरा। गच्छामि तावत् अन्नब्रह्मनिषेवणाय।

(राजा राज्ञी च सुमधुरसौहार्दस्मितपूर्वकं परस्परमभिनन्दन्तौ निष्क्रामतः।

## प्रश्नाः

१. कालिदासेन उक्तस्य श्लोकस्य भावः कः?

२. कालिदासश्लोके भोजेन प्राप्तं समाधानं किम्?

३. भोजः कोशाध्यक्षं प्रति किं सूचितवान्?

४. कालिदासः महाराजं कथं सन्तोषितवान्?

# शेमुषी परीक्षा

अभ्यासः - १

अभ्यासः - २

अभ्यासः - ३

अभ्यासः - ४

अभ्यासः - ५

# शेमुषीपरीक्षा

# १ शेमुषीपरीक्षा

## अभ्यासः - १

अस्ति कस्मिंश्चित् पर्वतैकदेशे महान् वृक्षः। तत्र च सिन्धुकनामा कोऽपि पक्षी प्रतिवसति स्म। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित् तमुद्दिश्य व्याधः कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पतनसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्। अहो- मम शिशुकालादारभ्य शकुनि-बन्ध-व्यसनिनोऽशीति-वर्षाणि समभूवन्। न च कदाचित्पक्षिपुरीषे सुवर्णं दृष्टम् इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध।

**प्रश्नाः**

१. वृक्षे प्रतिवसतः पक्षिणो नाम किम्?

२. कस्मिन् सुवर्णमुत्पद्यते?

३. पक्षिणमुद्दिश्य कः समाययौ?

४. स पक्षी कुत्र पुरीषमुत्ससर्ज?

५. व्याधः वृक्षे कं बबन्ध?

## अभ्यासः - २

कस्मिंश्चित् वनोद्देशे करालकेसरो नाम सिंहः प्रतिवसति स्म। तस्य धूसरको नाम सृगालः सदैवानुयायी परिचारकोऽस्ति। अथ कदाचित् तस्य हस्तिना सह युध्यमानस्य शरीरे गुरुतराः प्रहाराः सञ्जाताः यैः पदमेकमपि चलितुं न शक्नोति। तस्य अचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः। अन्यस्मिन्नहनि तमवोचत्- "स्वामिन्! बुभुक्षया पीडितोऽहम्। पदात्पदमपि चलितुं न शक्नोमि। तत्कथं ते शुश्रूषां करोमि"। सिंह आह- "भोः! गच्छ। अन्वेषय किञ्चित् सत्त्वम्। येनेमाम् अवस्थां गतोऽपि व्यापादयामि"।

**प्रश्नाः**

१. सिंहस्य नाम किम्?

२. परिचारकः कः?

३. सृगालः येन सह युद्धं कृतवान्?

४. धूसरकः सिंहं प्रति किमब्रवीत्?

५. सिंहः सृगालं प्रति किमाह?

## अभ्यासः - ३

चित्रकूटपर्वतनिकटतपोवनमध्ये मनोहरः कश्चित् देवालयोऽस्ति। तत्र च पर्वते अत्युदग्रात् शिखरात् विमला कापि जलधारा पतति। तत्र स्नानमात्रेण महापातकादीन्यपि नश्यन्ति। किञ्च, यस्तु पापीयान् स्नानमाचरति तस्य देहात् अतीव कलुषमुदकं निस्सरति। तेन सः पूतो भवति। अन्यच्च तत्र कश्चित् ब्राह्मणो महति होमकुण्डे प्रतिदिनं होमं करोति। न जाने तस्य कति वत्सरा गता इति। प्रतिदिनं कुण्डाद्बहिः प्रेरितं भस्म पर्वताकारम् अस्ति। स केनापि न भाषते। एवमतिविचित्रं स्थानमद्राक्षीदयं जनः।

### प्रश्नाः

१. देवालयः कुत्र अस्ति?

२. जलधारा कस्मात् पतति?

३. प्रतिदिनं होमकुण्डे कः होमं करोति?

४. जनः कीदृशं स्थानमद्राक्षीत्?

५. कस्य देहात् अतीव कलुषमुदकं निस्सरति?

# अभ्यासः - ४

अस्ति मगधदेशे चम्पकवतीनाम अरण्यानी। तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगालेन अवलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत्- आह- "कथम् एतन्मासं सुललितं भक्षयामि? भवतु। विश्वासं तावदुत्पादयामि" इत्यालोच्य उपसृत्य अब्रवीत्- "मित्र! कुशलं ते" इति। मृगेणोक्तम्- "कस्त्वम्"? इति। स ब्रूते- "क्षुद्रबुद्धिर्नाम जम्बुकोऽहम्। अत्र आरण्ये बन्धुहीने मृतवत् एकाकी निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया भवितव्यम्"। मृगेणोक्तम् - "एवमस्तु" इति।

**प्रश्नाः**

१. चम्पकवतीनाम अरण्यानी कुत्र अस्ति?

२. मृगकाकौ कथं निवसतः?

३. मृगः केन अवलोकितः?

४. जम्बुकस्य नाम किम्?

५. शृगालः मृगं दृष्ट्वा किमचिन्तयत्?

## अभ्यासः - ५

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्पटीवृक्षः। तस्य कोटरे दैव-दुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद् वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य तस्मै ददति। तेन असौ जीवति। तेषां शावकरक्षां च करोति। अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्र आगतः। ततस्तम् आयान्तं दृष्ट्वा पक्षिशावकैः भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेण उक्तम्- ''कोऽयमायाति''? इति। दीर्घकर्णो गृध्रमवलोक्य सभयमाह-''हा हतोऽस्मि। यतोऽयं मां व्यापादयिष्यति'' इति।

**प्रश्नाः**

१. पर्पटीवृक्षः कुत्रास्ति?

२. वृक्षस्य कोटरे कः प्रतिवसति?

३. मार्जारः किमर्थं तत्र आगतः?

४. कोलाहलः कैः कृतः?

५. दीर्घकर्णः गृध्रमवलोक्य किमाह?

# व्याकरणम्

१. शब्दाः

२. सन्धयः

३. समासाः

४. वाक्यनिर्माणम्

# व्याकरणम्

# १ शब्दरूपाणि

सर्वास्वपि भाषासु नामवाचकाः, सर्वनामवाचकाः विशेषणवाचकाश्च विद्यन्ते। एतानि सर्वाण्यपि पदानि अत्र संस्कृतभाषायां शब्दाः इति पदेन व्यवह्रियन्ते। शब्देषु अन्तभेदः लिङ्गभेदः इति अंशद्वयं विद्यते। पुम्-स्त्री-नपुंसक इति लिङ्गत्रयं विद्यते। शब्दस्य सप्तविभक्तयः त्रीणि वचनानि च सन्ति। सप्त विभक्तयः त्रीणि वचनानि संबोधनप्रथमाविभक्तेः विभक्तित्रयं च आहत्य चतुर्विंशतिसंख्याकानि शब्दरूपाणि भवन्ति। सर्वनामशब्देषु सम्बोधनप्रथमाविभक्तिरूपाणि न भवन्ति। अतः सर्वनामशब्देषु एकविंशतिरूपाण्येव भवन्ति।

## हलन्तपुंलिङ्गशब्दाः

### १. चकारान्तः पुंलिङ्गः 'जलमुक्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| जलमुक् | जलमुचौ | जलमुचः | प्रथमाविभक्तिः |
| हे जलमुक् | हे जलमुचौ | हे जलमुचः | संबोधनप्रथमाविभक्तिः |
| जलमुचम् | जलमुचौ | जलमुचः | द्वितीयाविभक्तिः |
| जलमुचा | जलमुग्भ्याम् | जलमुग्भिः | तृतीयाविभक्तिः |
| जलमुचे | जलमुग्भ्याम् | जलमुग्भ्यः | चतुर्थीविभक्तिः |
| जलमुचः | जलमुग्भ्याम् | जलमुग्भ्यः | पञ्चमीविभक्तिः |
| जलमुचः | जलमुचोः | जलमुचाम् | षष्ठीविभक्तिः |
| जलमुचि | जलमुचोः | जलमुक्षु | सप्तमीविभक्तिः |

## २. जकारान्तः पुंलिङ्गः 'वणिक्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वणिक् | वणिजौ | वणिजः | प्रथमाविभक्तिः |
| हे वणिक् | हे वणिजौ | हे वणिजः | संवोधनप्रथमाविभक्तिः |
| वणिजम् | वणिजौ | वणिजः | द्वितीयाविभक्तिः |
| वणिजा | वणिग्भ्याम् | वणिग्भिः | तृतीयाविभक्तिः |
| वणिजे | वणिग्भ्याम् | वणिग्भ्यः | चतुर्थीविभक्तिः |
| वणिजः | वणिग्भ्याम् | वणिग्भ्यः | पञ्चमीविभक्तिः |
| वणिजः | वणिजोः | वणिजाम् | षष्ठीविभक्तिः |
| वणिजि | वणिजोः | वणिक्षु | सप्तमीविभक्तिः |

## ३. तकारान्तः पुंलिङ्गः 'भवत्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| भवान् | भवन्तौ | भवन्तः | प्रथमाविभक्तिः |
| हे भवन् | हे भवन्तौ | हे भवन्तः | संवोधनप्रथमाविभक्तिः |
| भवन्तम् | भवन्तौ | भवतः | द्वितीयाविभक्तिः |
| भवता | भवद्भ्याम् | भवद्भिः | तृतीयाविभक्तिः |
| भवते | भवद्भ्याम् | भवद्भ्यः | चतुर्थीविभक्तिः |
| भवतः | भवद्भ्याम् | भवद्भ्यः | पञ्चमीविभक्तिः |
| भवतः | भवतोः | भवताम् | षष्ठीविभक्तिः |
| भवति | भवतोः | भवत्सु | सप्तमीविभक्तिः |

### ४. नकारान्तः पुंलिङ्गः 'राजन्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| राजा | राजानौ | राजानः | प्रथमाविभक्तिः |
| हे राजन् | हे राजानौ | हे राजानः | संबोधनप्रथमाविभक्तिः |
| राजानम् | राजानौ | राज्ञः | द्वितीयाविभक्तिः |
| राज्ञा | राजभ्याम् | रजभिः | तृतीयाविभक्तिः |
| राज्ञे | राजभ्याम् | राजभ्यः | चतुर्थीविभक्तिः |
| राज्ञः | राजभ्याम् | राजभ्यः | पञ्चमीविभक्तिः |
| राज्ञः | राज्ञोः | राज्ञाम् | षष्ठीविभक्तिः |
| राज्ञि/राजनि | राज्ञोः | राजसु | सप्तमीविभक्तिः |

## हलन्तस्त्रीलिङ्गशब्दाः

### ५. चकारान्तः स्त्रीलिङ्गः 'वाक्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वाक् | वाचौ | वाचः | प्रथमाविभक्तिः |
| हे वाक् | हे वाचौ | हे वाचः | संवोधनप्रथमाविभक्तिः |
| वाचम् | वाचौ | वाचः | द्वितीयाविभक्तिः |
| वाचा | वाग्भ्याम् | वाग्भिः | तृतीयाविभक्तिः |
| वाचे | वाग्भ्याम् | वाग्भ्यः | चतुर्थीविभक्तिः |
| वाचः | वाग्भ्याम् | वाग्भ्यः | पञ्चमीविभक्तिः |
| वाचः | वाचोः | वाचाम् | षष्ठीविभक्तिः |
| वाचि | वाचोः | वाक्षु | सप्तमीविभक्तिः |

## ६. जकारान्तः स्त्रीलिङ्गः 'स्रज्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| स्रक् | स्रजौ | स्रजः | प्रथमाविभक्तिः |
| हे स्रक् | हे स्रजौ | हे स्रजः | संबोधनप्रथमाविभक्तिः |
| स्रजम् | स्रजौ | स्रजः | द्वितीयाविभक्तिः |
| स्रजा | स्रग्भ्याम् | स्रग्भिः | तृतीयाविभक्तिः |
| स्रजे | स्रग्भ्याम् | स्रग्भ्यः | चतुर्थीविभक्तिः |
| स्रजः | स्रग्भ्याम् | स्रग्भ्यः | पञ्चमीविभक्तिः |
| स्रजः | स्रजोः | स्रजाम् | षष्ठीविभक्तिः |
| स्रजि | स्रजोः | स्रक्षु | सप्तमीविभक्तिः |

## ७. तकारान्तः स्त्रीलिङ्गः 'सरित्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सरित् | सरितौ | सरितः | प्रथमाविभक्तिः |
| हे सरित् | हे सरितौ | हे सरितः | संबोधनप्रथमाविभक्तिः |
| सरितम् | सरितौ | सरितः | द्वितीयाविभक्तिः |
| सरिता | सरिद्भ्याम् | सरिद्भिः | तृतीयाविभक्तिः |
| सरिते | सरिद्भ्याम् | सरिद्भ्यः | चतुर्थीविभक्तिः |
| सरितः | सरिद्भ्याम् | सरिद्भ्यः | पञ्चमीविभक्तिः |
| सरितः | सरितोः | सरिताम् | षष्ठीविभक्तिः |
| सरिति | सरितोः | सरित्सु | सप्तमीविभक्तिः |

## ८. दकारान्तः स्त्रीलिङ्गः 'सम्पद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सम्पद् | सम्पदौ | सम्पदः | प्रथमाविभक्तिः |
| हे सम्पद् | हे सम्पदौ | हे सम्पदः | संबोधनप्रथमाविभक्तिः |
| सम्पदम् | सम्पदौ | सम्पदः | द्वितीयाविभक्तिः |
| सम्पदा | सम्पद्भ्याम् | सम्पद्भिः | तृतीयाविभक्तिः |
| सम्पदे | सम्पद्भ्याम् | सम्पद्भ्यः | चतुर्थीविभक्तिः |
| सम्पदः | सम्पद्भ्याम् | सम्पद्भ्यः | पञ्चमीविभक्तिः |
| सम्पदः | सम्पदोः | सम्पदाम् | षष्ठीविभक्तिः |
| सम्पदि | सम्पदोः | सम्पत्सु | सप्तमीविभक्तिः |

## हलन्तनपुंसकलिङ्गशब्दाः

## ९. तकारान्तः नपुंसकलिङ्गः 'महत्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| महत् | महती | महान्ति | प्रथमाविभक्तिः |
| हे महत् | हे महती | हे महान्ति | संबोधनप्रथमाविभक्तिः |
| महत् | महती | महान्ति | द्वितीयाविभक्तिः |
| महता | महद्भ्याम् | महद्भिः | तृतीयाविभक्तिः |
| महते | महद्भ्याम् | महद्भ्यः | चतुर्थीविभक्तिः |
| महतः | महद्भ्याम् | महद्भ्यः | पञ्चमीविभक्तिः |
| महतः | महतोः | महताम् | षष्ठीविभक्तिः |
| महति | महतोः | महत्सु | सप्तमीविभक्तिः |

## १०. तकारान्तः नपुंसकलिङ्गः 'पचत्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| पचत् | पचती | पचन्ति | प्रथमाविभक्तिः |
| हे पचत् | हे पचती | हे पचन्ति | संबोधनप्रथमाविभक्तिः |
| पचत् | पचती | पचन्ति | द्वितीयाविभक्तिः |
| पचता | पचद्भ्याम् | पचद्भिः | तृतीयाविभक्तिः |
| पचते | पचद्भ्याम् | पचद्भ्यः | चतुर्थीविभक्तिः |
| पचतः | पचद्भ्याम् | पचद्भ्यः | पञ्चमीविभक्तिः |
| पचतः | पचतोः | पचताम् | षष्ठीविभक्तिः |
| पचति | पचतोः | पचत्सु | सप्तमीविभक्तिः |

## ११. तकारान्तः नपुंसकलिङ्गः 'जगत्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| जगत् | जगती | जगन्ति | प्रथमाविभक्तिः |
| हे जगत् | हे जगती | हे जगन्ति | संबोधनप्रथमाविभक्तिः |
| जगत् | जगती | जगन्ति | द्वितीयाविभक्तिः |
| जगता | जगद्भ्याम् | जगद्भिः | तृतीयाविभक्तिः |
| जगते | जगद्भ्याम् | जगद्भ्यः | चतुर्थीविभक्तिः |
| जगतः | जगद्भ्याम् | जगद्भ्यः | पञ्चमीविभक्तिः |
| जगतः | जगतोः | जगताम् | षष्ठीविभक्तिः |
| जगति | जगतोः | जगत्सु | सप्तमीविभक्तिः |

## १२. सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| मनः | मनसी | मनांसि | प्रथमाविभक्तिः |
| हे मनः | हे मनसी | हे मनांसि | संबोधनप्रथमाविभक्तिः |
| मनः | मनसी | मनांसि | द्वितीयाविभक्तिः |
| मनसा | मनोभ्याम् | मनोभिः | तृतीयाविभक्तिः |
| मनसे | मनोभ्याम् | मनोभ्यः | चतुर्थीविभक्तिः |
| मनसः | मनोभ्याम् | मनोभ्यः | पञ्चमीविभक्तिः |
| मनसः | मनसोः | मनसाम् | षष्ठीविभक्तिः |
| मनसि | मनसोः | मनस्सु | सप्तमीविभक्तिः |

## सर्वनामशब्दाः

## १३. दकारान्तः पुंलिङ्गः 'यद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| यः | यौ | ये | प्रथमाविभक्तिः |
| यम् | यौ | यान् | द्वितीयाविभक्तिः |
| येन | याभ्याम् | यैः | तृतीयाविभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | चतुर्थीविभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | पञ्चमीविभक्तिः |
| यस्य | ययोः | येषाम् | षष्ठीविभक्तिः |
| यस्मिन् | ययोः | येषु | सप्तमीविभक्तिः |

## १४. दकारान्तः स्त्रीलिङ्गः 'यद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| या | ये | याः | प्रथमाविभक्तिः |
| याम् | ये | याः | द्वितीयाविभक्तिः |
| यया | याभ्याम् | याभिः | तृतीयाविभक्तिः |
| यस्यै | याभ्याम् | याभ्यः | चतुर्थीविभक्तिः |
| यस्याः | याभ्याम् | याभ्यः | पञ्चमीविभक्तिः |
| यस्याः | ययोः | यासाम् | षष्ठीविभक्तिः |
| यस्याम् | ययोः | यासु | सप्तमीविभक्तिः |

## १५. दकारान्तः नपुंसकलिङ्गः 'यद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| यत् | ये | यानि | प्रथमाविभक्तिः |
| यत् | ये | यानि | द्वितीयाविभक्तिः |
| येन | याभ्याम् | यैः | तृतीयाविभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | चतुर्थीविभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | पञ्चमीविभक्तिः |
| यस्य | ययोः | येषाम् | षष्ठीविभक्तिः |
| यस्मिन् | ययोः | येषु | सप्तमीविभक्तिः |

## १६. दकारान्तः पुंलिङ्गः 'एतद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| एषः | एतौ | एते | प्रथमाविभक्तिः |
| एतम्/एनम् | एतौ/एनौ | एतान्/एनान् | द्वितीयाविभक्तिः |
| एतेन/एनेन | एताभ्याम् | एतैः | तृतीयाविभक्तिः |
| एतस्मै | एताभ्याम् | एतेभ्यः | चतुर्थीविभक्तिः |
| एतस्मात् | एताभ्याम् | एतेभ्यः | पञ्चमीविभक्तिः |
| एतस्य | एतयोः/एनयोः | एतेषाम् | षष्ठीविभक्तिः |
| एतस्मिन् | एतयोः/एनयोः | एतेषु | सप्तमीविभक्तिः |

## १७. दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| एषा | एते | एताः | प्रथमाविभक्तिः |
| एताम्/एनाम् | एते/एने | एताः/एनाः | द्वितीयाविभक्तिः |
| एतया/एनया | एताभ्याम् | एताभिः | तृतीयाविभक्तिः |
| एतस्यै | एताभ्याम् | एताभ्यः | चतुर्थीविभक्तिः |
| एतस्याः | एताभ्याम् | एताभ्यः | पञ्चमीविभक्तिः |
| एतस्याः | एतयोः/एनयोः | एतासाम् | षष्ठीविभक्तिः |
| एतस्याम् | एतयोः/एनयोः | एतासु | सप्तमीविभक्तिः |

## १८. दकारान्तः नपुंसकलिङ्गः 'एतद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| एतत् | एते | एतानि | प्रथमाविभक्तिः |
| एतत्/एनत् | एते/एने | एतानि/एनानि | द्वितीयाविभक्तिः |
| एतेन/एनेन | एताभ्याम् | एतैः | तृतीयाविभक्तिः |
| एतस्मै | एताभ्याम् | एतेभ्यः | चतुर्थीविभक्तिः |
| एतस्मात् | एताभ्याम् | एतेभ्यः | पञ्चमीविभक्तिः |
| एतस्य | एतयोः/एनयोः | एतेषाम् | षष्ठीविभक्तिः |
| एतस्मिन् | एतयोः/एनयोः | एतेषु | सप्तमीविभक्तिः |

# २ सन्धयः

## १. श्चुत्वसन्धिः

सूत्रम्- स्तोः श्चुना श्चुः।

सकार-तवर्गयोः शकार-चवर्गाभ्यां योगे क्रमात् शकार-चवर्गौ स्तः।

१. शरत् + चन्द्रः = शरच्चन्द्रः

२. सत् + चिदानन्दः= सच्चिदानन्दः

३. मनस् + चलति = मनश्चलति

४. सद् +जनः = सज्जनः

५. जगद् +जननी = जगज्जननी

## २. ष्टुत्वसन्धिः

सूत्रम्- ष्टुना ष्टुः।

षकार-तवर्गयोः षकार-टवर्गाभ्यां योगे क्रमात् षकार-टवर्गौ स्तः।

१. रामस् + टीकते = रामष्टीकते

२. तत् + टीका = तट्टीका

३. उत् + डयनम् = उड्डयनम्

४. पेस् + टा = पेष्टा

### ३. जश्त्वसन्धिः

सूत्रम्- झलां जशोऽन्ते।

पदान्ते झलां जशः स्युः। नाम वर्गप्रथमाक्षराणि तृतीयाक्षराणि भवन्ति।

१. वाक् + ईशः = वागीशः

२. अच् +अन्तः = अजन्तः

३. षट् +आननः = षडाननः

४. तत् + अपि = तदपि

### ४. अनुनासिकसन्धिः

सूत्रम्- यरोनुनासिकेनुनासिको वा।

१. वाक् + मयम् = वाङ्मयम्

२. तत् + मात्रम् = तन्मात्रम्

३. जगत् + नाथः = जगन्नाथः

४. षट् + मुखः = षण्मुखः

### ५. विसर्गसन्धिः

सूत्रम्- अतो रो रप्लुतादप्लुते।

अप्लुतादतः परस्य रोरुः स्यादप्लुते अति।

१. शिवः + अहम् = शिवोऽहम्

२. सः + अपि = सोऽपि

३. कः + अपि = कोऽपि

४. रामः + अपि = रामोऽपि

## ६. विसर्गरेफादेशसन्धिः

सूत्रम्- ससजुषोरुः।

पदान्तस्य सस्य सजुषश्च रुः स्यात्।

१. कविः+ आयाति = कविरायाति

२. पितुः + इच्छा = पितुरिच्छा

३. नृपतिः+ जयति = नृपतिर्जयति

४. हरिः + गच्छति = हरिर्गच्छति

# ३ समासाः

षोढा समासाः संक्षेपात् अष्टाविंशतिधा पुनः।
तत्र अष्टधा तत्पुरुषः सप्तधा कर्मधारयः॥
सप्तधा च बहुव्रीहिः द्विगुराभाषितो द्विधा।
द्वन्द्वोऽपि द्विविधो ज्ञेयः अव्ययीभावो द्विधा मतः॥

| | | |
|---|---|---|
| १. तत्पुरुषसमासः | - अष्टविधः | - ८ (8) |
| २. कर्मधारयसमासः | - सप्तविधः | - ७ (7) |
| ३. बहुव्रीहिसमासः | - सप्तविधः | - ७ (7) |
| ४. द्विगुसमासः | - द्विविधः | - २ (2) |
| ५. द्वन्द्वसमासः | - द्विविधः | - २ (2) |
| ६. अव्ययीभावसमासः | - द्विविधः | - २ (2) |
| | | २८(28) |

## १. तत्पुरुषसमासः

**तत्पुरुषोऽष्टविधोऽभूत् प्रथमादि विभक्तिनञ् कृतैर्भेदैः।**
**उत्तरपदजनितार्थो मुख्यः तत्रेति पण्डितैः ख्यातः।।**

| समासनाम | समासपदम् | विग्रहवाक्यम् |
|---|---|---|
| १. प्रथमातत्पुरुषसमासः | उत्तरकायः | उत्तरं कायस्य |
| २. द्वितीयातत्पुरुषसमासः | कृष्णश्रितः | कृष्णं श्रितः |
| ३. तृतीयातत्पुरुषसमासः | विद्यानिपुणः | विद्यया निपुणः |
| ४. चतुर्थीतत्पुरुषसमासः | यूपदारु | यूपाय दारु |
| ५. पञ्चमीतत्पुरुषसमासः | व्याघ्रभीतः | व्याघ्रात् भीतः |
| ६. षष्ठीतत्पुरुषसमासः | वृक्षमूलम् | वृक्षस्य मूलम् |
| ७. सप्तमीतत्पुरुषसमासः | ईश्वराधीनम् | ईश्वरे अधीनम् |
| ८. नञ् तत्पुषसमासः | अहिंसा | न हिंसा |

## २. कर्मधारयसमासः

**कविभिः सप्तविधः स्यादित्येवं कर्मधारयः कथितः।**
**तत्पुरुषान्तर्भावात् तद्वत् प्राधान्यमीरितं चास्य।।**

**विशेषणं पूर्वपदे तथोभयत्रापि विशेषणं च।**
**यस्योपमानं परतस्तदादौ संभावना चाप्यवधारणा च।।**

| समासनाम | समासपदम् | विग्रहवाक्यम् |
|---|---|---|
| १. विशेषपूर्वपदकर्मधारयसमासः | अल्पवातः | अल्पश्च असौ वातश्च |
| २. विशेषपूर्वपदकर्मधारयसमासः | मयूरव्यंसकाः | व्यंसकाश्च ते मयूराश्च |
| ३. विशेषपूर्वपदकर्मधारयसमासः | स्नातानुलिप्ताः | स्नाताश्च ते अनुलिप्ताश्च |
| ४. उपमानपूर्वपदकर्मधारयसमासः | लतातन्वी | लता इव तन्वी |
| ५. उपमानोत्तरपदकर्मधारयसमासः | पुरुषव्याघ्रः | पुरुषः व्याघ्रः इव |
| ६. सम्भावनापूर्वपदकर्मधारयसमासः | विन्ध्यपर्वतः | विन्ध्यपर्वतः |
| ७. अवधारणापूर्वपदकर्मधारयसमासः | युक्तिरत्नानि | युक्तयः एव रत्नानि |

## ३. द्विगुसमासः

**स चैकवद्भाव्यनेकवद्भावीति द्विधा द्विगुः।**
**कर्मधारय एवास्यान्तर्भावो बुधैर्मतः।।**

| समासपदम् | विग्रहवाक्यम् |
|---|---|
| १. त्रिलोकी | त्रयाणां लोकानां समाहारः |
| २. त्रिभुवनम् | त्रयानां भुवनानां समारः |
| ३. नवरात्रम् | नवानां रात्रीनां समाहारः |
| ४. सप्तर्षयः | सप्त च ते ऋषयश्च |

### ४. द्वन्द्वसमासः

**यस्मिन् समासे प्राधान्यम् उभयोः स्यात्पदार्थयोः।**
**स हि द्वन्द्वो द्विधा ज्ञेयः बुधैरिति विनिश्चितः॥**

| समासपदम् | विग्रहवाक्यम् |
|---|---|
| १. रामलक्ष्मणौ | रामः च लक्ष्मणः च |
| २. कंसकृष्णौ | कंसः च कृणः च |
| ३. शिवकेशवौ | शिवः च केशवः च |
| ४. धर्मार्थकामाः | धर्मः च अर्थः च कामः च |

### ५. अव्ययीभावसमासः

**यस्याभवत् पूर्वपदेव्ययस्य नाम्नो विधानात् द्विविधं च लक्ष्म।**
**पूर्वः पदार्थोपि च यत्र मुख्यः तमव्ययीभावमुदाहरामः॥**

| समासपदम् | विग्रहवाक्यम् |
|---|---|
| १. यथाशक्ति | शक्तिम् अनतिक्रम्य |
| २. प्रत्यक्षम् | अक्ष्णोः समीपे |
| ३. शाकप्रति | शाकस्य लेशः |

## ६. बहुव्रीहिसमासः

**सप्तभिराख्याभिर्वा विख्यातो यः सर्वैर्बहुव्रीहिः।**
**अन्यपदार्थो मुख्यः कथितो विबुधैर्बहुव्रीहौ।।**
**द्वाभ्यां पदाभ्यां बहुभिः पदैर्वा संख्योभयोः सा पदयोः पदाग्रे।**
**यस्याभवत्पूर्वपदे सहश्च दिगन्तरालव्यतिहारलक्ष्मा।।**
**बहुव्रीहिः प्रायेण अन्यपदार्थो विशिष्यनिघ्नश्च।।**

| समासनाम | समासपदम् | विग्रहवाक्यम् |
|---|---|---|
| १. द्विपदबहुव्रीहिसमासः | महाबलः | महत् बलं यस्य सः |
| २. बहुपदबहुव्रीहिसमासः | नीलोज्ज्वलवपुः | नीलं उज्वलं वपुः यस्य सः |
| ३. संख्योभयपदबहुव्रीहिसमासः | द्वित्राः | द्वौ वा त्रयो वा |
| ४. संख्योत्तरपदबहुव्रीहिसमासः | उपदशाः | दशानां समीपे ये सन्ति ते |
| ५. सहपूर्वपदबहुव्रीहिसमासः | सहपुत्रः | पुत्रेण सह वर्तते इति |
| ६. दिगन्तराललक्षणबहुव्रीहिसमासः | दक्षिणपूर्वा | दक्षिणस्याश्च पूर्वस्याश्चदिशः अन्तराले |
| ७. व्यतिहारलक्षणबहुव्रीहिसमासः | दण्डादण्डि | दण्डैःदण्डैः प्रहृत्य इदं युद्धं प्रवृत्तम |

# ४ वाक्यनिर्माणम्

संस्कृतभाषायां वाक्यनिर्माणे क्रियापदं कर्तारमनुगच्छति। कर्ता क्रिया च समवचने वर्तेते। अत्र अधोनिर्दिष्टासु पट्टिकासु प्रथमकोष्ठे कर्तृवाचकपदानि दत्तानि। द्वितीयकोष्ठे कर्मवाचकपदानि, एवमेव तृतीयकोष्ठे क्रियापदानि च दत्तानि। एतानि आधारीकृत्य साधुवाक्यनिर्माणं करणीयम्।

यथा-

## अभ्यासपट्टिका - १

| | | |
|---|---|---|
| शिवः | फलं | खादामि |
| सः | पाठं | पठसि |
| अहं | चित्रं | पश्यति |
| त्वं | देवं | पिबति |
| गीता | क्षीरं | पूजयति |

१. शिवः चित्रं पश्यति।

२. शिवः देवं पूजयति।

३. शिवः क्षीरं पिबति।

४. सः चित्रं पश्यति।

५. सः देवं पूजयति।

६. सः क्षीरं पिबति।

७. अहं फलं खादामि।

८. त्वं पाठं पठसि

९. गीता चित्रं पश्यति।

१०. गीता देवं पूजयति।

११. गीता क्षीरं पिबति

## अभ्यासपट्टिका - २

| | | |
|---|---|---|
| रमेशः | किं | गच्छति |
| गोविन्दः | किमर्थं | करोति |
| त्वं | कुत्र | पठामि |
| रामः | कदा | वसति |
| अहं | | पिबसि |

## अभ्यासपट्टिका - ३

| | | |
|---|---|---|
| गणेशः | सत्यं | खादिष्यति |
| | फलं | करिष्यति |
| कृष्णः | ग्रामं | पठिष्यामि |
| त्वं | कदा | वदिष्यति |
| रामः | पाठं | गमिष्यसि |

अहं

## अभ्यासपट्टिका - ४

| | | |
|---|---|---|
| वयं | ग्रामं | गमिष्यन्ति |
| यूयं | समाधानं | करिष्यन्ति |
| ते | पाकं | पठिष्यामः |
| ताः | सत्यं | वदिष्यन्ति |
| देवाः | देवालयं | लेखिष्यथ |

## अभ्यासपट्टिका - ५

<table>
<tr><td>कविता</td><td rowspan="5">क्षीरं<br>उत्तरं<br>पाठं<br>देवं</td><td>अनमत्</td></tr>
<tr><td>राजेशः</td><td>अपठत्</td></tr>
<tr><td>त्वं</td><td>अपठम्</td></tr>
<tr><td>रामः</td><td>अलिखम्</td></tr>
<tr><td>अहं</td><td>अपिबः</td></tr>
</table>

# Annexure-II

## Board of Intermediate Education - Second Year - 2019

## Question Paper Pattren - Sanskrit

**Note-** Except Q.No.1,2&3 All Questions should be answered in Sanskrit only.

**सूचना-** प्रथम-द्वितीय-तृतीयप्रश्नान् विहाय सर्वे प्रश्नाः संस्कृते एव समाधेयाः।

| | | |
|---|---|---|
| I. श्लोकस्य प्रतिपदार्थं भावं च लिखत। | 1 Out of 2 | 8 Marks |
| (From lessons No.03 & 04 only) | | |
| II. निबन्धप्रश्नः (पद्यभागात्) | 1 Out of 2 | 6 Marks |
| (From poetry lessons No.01,02, & 05,06 questions may be asked) | | |
| III. निबन्धप्रश्नः (गद्यभागात्) | 1 Out of 2 | 6 Marks |
| (From prose lessons No.01,02, & 05,06 questions may be asked) | | |
| IV. प्रश्नाः (उपवाचकात्) | 3 Out of 6 | 6 Marks |
| V. सन्दर्भवाक्यानि (पद्यभागात्) | 2 Out of 4 | 6 Marks |
| VI. सन्दर्भवाक्यानि (गद्यभागात्) | 2 Out of 4 | 6 Marks |
| VII. लघुप्रश्नाः (पद्यभागात्) | 3 Out of 6 | 6 Marks |
| VIII. लघुप्रश्नाः (गद्यभागात्) | 3 Out of 6 | 6 Marks |
| IX. एकपदसमाधानप्रश्नाः। (पद्यभागात्) | 5 Out of 5 | 5 Marks |
| X. एकपदसमाधानप्रश्नाः। (गद्यभागात्) | 5 Out of 5 | 5 Marks |
| XI. शेमुषीपरीक्षा | 5 Out of 5 | 5 Marks |
| XII. सन्धत्त | 3 Out of 6 | 6 Marks |
| XIII. सन्धिं विघटयत। | 3 Out of 6 | 6 Marks |
| XIV. शब्दरूपाणि | 2 Out of 4 | 12 Marks |
| XV. समासाः | 3 Out of 6 | 6 Marks |
| XVI. वाक्यनिर्माणम् | 5 Out of 5 | 5 Marks |
| | | TOTAL - 100 Marks |

## Board of Intermediate Education - Second Year - 2019

## Second Language - Sanskrit

## मानकप्रश्नपत्रम् - संस्कृतम्

## Modal Question Paper - Sanskrit

Time - 3 hrs. Marks - 100

सूचना- प्रथम,द्वितीय,तृतीयप्रश्नान् विहाय सर्वेऽपि प्रश्नाः संस्कृते एव समाधातव्याः।

**I. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत।** 1 X 8 = 8

अ) **परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।**
**वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥**

आ) **परोपदेशसमये जनाः सर्वेऽपि पण्डिताः।**
**तदनुष्ठानसमये मुनयोऽपि न पण्डिताः॥**

**II. एकं निबन्धप्रश्नं समाधत्त।** 6 X 1 = 6

अ) रावणाय विभीषणेन कृतमुपदेशं लिखत।

आ) मातृभूमेः वैभवं कविः कथं प्रशशंस ?

**III. एकं निबन्धप्रश्नं समाधत्त।** 6 X 1 = 6

अ) मन्दविषसर्पकथां सङ्ग्रहेण लिखत।

आ) भिषजः भैषज्यम् इति पाठ्यभागस्य सारांशं संक्षेपेण लिखत।

**IV. त्रयाणां प्रश्नानां समाधानानि लिखत।** 3 X 2 =6

अ. कीदृशं वस्तु तथैव तिष्ठति?

आ. कर्णभारं केन विरचितम्?

इ. केन द्रुपदः गर्वान्धः जातः?

ई. बालानां कलहः कीदृशः?

उ. कालिदासश्लोके भोजेन प्राप्तं समाधानं किम्?

ऊ. भोजः कोशाध्यक्षं प्रति किं सूचितवान्?

**V. द्वयोः ससंदर्भं व्याख्यानं लिखत।** 2 X 3 = 6

अ. अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।

आ. पिण्डेष्वनास्था खलु भौतिकेषु।

इ. यत्रैताः हृदि जागृताः प्रकृतयः सा मातृभूमिर्मम।

ई. भृत्या हि पक्त्री वद किं न सा स्त्री।

**VI. द्वयोः ससंदर्भं व्याख्यानं लिखत।** 2 X 3 = 6

अ. निवृत्तरागस्य गृहं तपोवनम्।

आ. यः कृतमुकारं विस्मरति स एव पुरुषाधमः।

इ. वैद्योऽपि मानव एव।

ई. अप्पय्यः साक्षात् परमशिवस्य अवतारः।

**VII. त्रयाणां प्रश्नानां समाधानानि लिखत** 3 X 2 = 6

अ. कदा प्रभृति अशुभानि निमित्तानि दृश्यन्ते?

आ. दिलीपेन सेव्यमानं नन्दिनीधेनुं कः चकर्ष?

इ. व्याधितस्य मित्रं किम्?

ई. देवः कुत्र सहायकृत् भवति?

उ. मानवानां प्रकृतिशुभगुणाः के?

ऊ. अमर्त्यवाण्याः मातृता कथम् आगता?

**VIII. त्रयाणां प्रश्नानां समाधानानि लिखत।** 3 X 2 = 6

अ. हितोपदेशे कति भागाः सन्ति? ते च के ?

आ. विक्रमेण पृष्टः भृत्यः किम् उत्तरमदात्?

इ. मानसारः कथं गदां प्राप्तवान्?

ई. श्रीधरः मातुः मरणसमये किं कुर्वन्नासीत्?

उ. प्रभुत्वचिकित्सालये नियोगेनागता भिषगङ्गना का?

ऊ. अप्पय्यदीक्षितः आन्ध्रभाषां कथं प्रशशंस?

**IX. एकेन वाक्येन समाधानं दत्त।** 5 X 1 = 5

अ. केषां बलानि अमेयानि?

आ. दिलीपस्य धर्मपत्नी का?

इ. कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते?

ई. मूर्खस्य कति चिह्नानि सन्ति?

उ. चित्रविंशतिः इति पाठ्यभागः कस्मात् स्वीकृतः?

**X. एकेन वाक्येन समाधानं दत्त।** 5 X 1 = 5

अ. कौण्डिन्यस्य पुत्रः कः?

आ. कुमारमानीय राज्ञे क ददौ?

इ. राजवाहनः कस्य पुत्रः?

ई. श्रीधरस्य मातुः नाम किम्?

उ. वेङ्कटरावस्य पत्नी का?

**XI. अधो निर्दिष्टकथां पठित्वा प्रश्नानां समाधानानि दत्त।** 5 X 1 = 5

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्पटीवृक्षः। तस्य कोटरे दैव-दुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्

वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चित् उद्धृत्य तस्मै ददति। तेन असौ जीवति। तेषां शाबकरक्षां च करोति। अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशाबकान् भक्षयितुं तत्र आगतः। ततस्तम् आयान्तं दृष्ट्वा पक्षिशाबकैः भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेण उक्तम्- ''कोऽयमायाति''? इति। दीर्घकर्णो गृध्रमवलोक्य सभयमाह-''हा हतोऽस्मि। यतोऽयं मां व्यापादयिष्यति'' इति।

**प्रश्नाः**

१. पर्पटीवृक्षः कुत्रास्ति?

२. वृक्षस्य कोटरे कः प्रतिवसति?

३. मार्जारः किमर्थं तत्र आगतः?

४. कोलाहलः कैः कृतः?

५. दीर्घकर्णः गृध्रमवलोक्य किमाह?

XII. **नामनिर्देशपूर्वकं त्रीणि सन्धत्त** 3 X 2 = 6

अ. शरत् + चन्द्रः

आ. तत् + टीका

इ. षट् +आननः

ई. तत् + मात्रम्

उ. शिवः + अहम्

ऊ. पितुः + इच्छा

XIII. **नामनिर्देशपूर्वकं त्रीणि विघटयत।** 3 X 2 = 6

अ. मनश्चलति

आ. रामष्टीकते

इ. वागीशः

ई. जगन्नाथः

उ. सोऽपि

ऊ. नृपतिर्जयति

**XIV. द्वयोः शब्दयोः सर्वविभक्तिरूपाणि लिखत।** 2 X 6 = 12

अ. वणिक्

आ. सरित्

इ. महत्

ई. यद् (पुं)

**XV. समासनामनिर्देशपूर्वकं त्रयाणां विग्रहवाक्यानि लिखत।** 3 X 2 = 6

अ. व्याघ्रभीतः

आ. लतातन्वी

इ. नवरात्रम्

ई. रामलक्ष्मणौ

उ. प्रत्यक्षम्

ऊ. उपदशाः

**XVI. अधोनिर्दिष्टपट्टिकामाधारीकृत्य पञ्चसाधुवाक्यानि लिखत।** 5 X 1 = 5

<table>
<tr><td>कविता</td><td rowspan="5">क्षीरं<br>उत्तरं<br>पाठं<br>देवं</td><td>अनमत्</td></tr>
<tr><td>राजेशः</td><td>अपठत्</td></tr>
<tr><td>त्वं</td><td>अपठम्</td></tr>
<tr><td>रामः</td><td>अलिखम्</td></tr>
<tr><td>अहं</td><td>अपिबः</td></tr>
</table>